
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

Acc. No. अनुक्र. 1549
Title - प्रकरणरत्नमाला.
Author - अभिनव स्वरूप
Date - ?
Subject - वेदान्त.
folio - 56 पत्रे.
Xerox - 57

॥ श्रीं नमः श्रीत्रिपुरसुंदर्यै ॥ ॥ कर्ता कर्म च करणं संप्रदानं तथैव च ।
करणे इत्याह कारकाणि षट् ॥ सुप्तिङंतं पदं । अत्र सुबिति स्वादयः सप्तविभक्त्य
श्रोच्यंते । तत्र प्रथममवगंतव्यां प्रथमा याः प्रथममेव तावत्तद्विचार्यते । का पुनरियं
प्रथमा । सुप्रत्ययससिति प्रथमा तत्स्याः पुनरेतल्लक्षणं । प्रातिपदिकार्थलिंगपरिमा
णवचनमात्रे प्रथमा । मात्रशब्दः प्रत्येकमभिसंबध्यते तत्र प्रातिपदिकार्थः सत्ता प्रा
कृतवादिनामेतद्दर्शनं । सत्ता प्रातिपदिकार्थ इति । तथा च तेषां दर्शनं । सत्तानामकाचि
दनादिनिधनरूपा नित्या तत्याघ्यवस्थिता सर्वशब्दैरभिधीयते इति । तदुक्तं संबंधि
दास्वपि व विद्यमानागवादिषु जातिरिति ख्याता तस्यां सर्वशब्दा व्यवस्थिताः ॥ आश्रः
मविशेषु क्रियासेवाभिधीयते । क्रमरूपस्य संहारसा सत्वमिति कथ्यते [illegible]
प्रातिपदिकार्थ [illegible] चप्रवप्रवर्तते [illegible] नित्यां समस्तानां [illegible]
[illegible]

॥

[illegible]

स्पर्द्धं किं कृत्वा मुकुंदं प्रणम्य कथंभूतं आनंदं तावद्रूपानंदस्वभावं। अनेन च यदाकुर्वद्धावैशेषिका
दयो लोके तावत् दुःखाभाव एवानंदो न तो विज्ञानमानंदं ब्रह्मेत्यादावपि दुःखाभाव एवानंद इति त
न्निराकरणं सूचितं। आत्मनः परमप्रेमास्पदत्वेनानंदरूपत्वे सिद्धे व तत्कार्य परमात्मन आनंदरूप
त्वे हेतुमाहात्मानमिति आत्मत्वाद् परात्मवदित्यर्थः। तथानंदमात्मानमिति सामान्याधिकरण्येन जी
वपरमात्मनोरेकत्वं च शास्त्रप्रमाणकं दर्शितं तन्न संसरतिसंसार्यसंसार्यादिना वेनन्तेदप्राहि
प्रमाणाविरोधादित्याशंक्याहासत्यभेदमिति बिंबप्रतिबिंबादिवत्कल्पितभेदावलंबनेन प्रामा
णिकात् भेदस्य न विरोध इत्यर्थः। अनेनैव च भेदस्यापि मिथ्यात्वं सूचितं द्वयवादिहेतुना तन्न
संतत्वात् मन्यनेकांतादित्याशंक्याह विज्ञानतनुमिति स्वप्रकाशसंविद्रूपमित्यर्थः। तस्य ज्ञाना
नंदाद्वितीयस्य परमात्मनः प्रसाधनेन प्रतिपादनेन सदोपयुक्तामिति स्वचलतेस्ताद्विषयत्वं दर्शितं

विज्ञानमानंदं ब्रह्मेत्यादौ तावदेवानंदशब्दार्थ इति वक्तुं प्रथमं लोके तावत् दुःखाभाव आनंदो न भवती
त्युपोद्घातमाह आनंद इति तदनिरूप्यत्वादिति दुःखाभावत्वस्यानवगम्यमानत्वादित्यर्थः। ननु दुःख
नैकांतं तस्य सपक्षव्यावृत्तत्वात् प्रमेयासु व्यवस्थापकस्य चात्र माणस्य न च स्वविशेषणविशेष्यतापत्तेर्न
अर्थस्येव विशेष्यत्वात् न च नन्वर्थो दुःखं घटस्यापि दुःखत्वप्रसंगात् किं वा रोपितत्वनिषेधस्यैव नगन्तुर
न्यमिति वक्तव्ये तो नानेकांतशंकापि। परपक्षप्रतिक्षेपार्थः प्रथमः प्रयोगो। द्वितीयस्तु सिद्धांतसिद्धये
नहि परपक्षप्रतिक्षेपमात्रात् सिद्धांतसिद्धिर्घटीति। ननु शशविषाणमित्यत्र प्रतियोग्यपेक्षा
नावभासते तो नेकांतः। न। प्रतियोग्यपेक्षया विना परोक्षतया वभासमानत्वादिति हेत्वर्थः। इदानीं
हेतोरसिद्धिं शंकते वाच्यमिति। यथा वाच्यत्वपासत्यशाह प्रमुख्य तेन तत्र वाच्यं न भवतीत्यवाच्य ॥२
मिति विद्यमानमपि प्रतियोग्यपेक्षं सत्यशब्दप्रयोगोपायेन प्रतीयते इत्येतावदेव तथा दुःखाभावस्य
विद्यमानमपि प्रतियोगिसापेक्षं च

मानंदपदोपाधेन प्रतीयत इत्येतावदेवानो सिद्धिरित्यर्थः। तर्हि यथाप्राप्तमाभ्यस्तावावगममंतरेण
नसत्यथानुभवस्तथाप्राप्तदुःखस्याभावावगममंतरेण सुखानुभवोऽपि न भवद्भवति च कदाचिद्दुःखा
सीनस्याकस्मादुपस्थितवीणादिनिश्रवणादेर्दुःखाभावावगममंतरेणापि सुखानुभवदर्शनात् परिहा
रार्थः। किंच सुखाभाव एव दुःखमिति विपरीतं वा कस्मान्न भवति। प्रतियोग्यनपेक्षत्वादिति चेन्न विद्य
मानमपि प्रतियोग्यपेक्षत्वं दुःखस्य शब्दप्रयोगोपाधेन प्रतीयत इत्येतावदेवास्तु केन न्यायेन वि
परीतमपि स्यादित्यर्थः। निःप्रतियोगिकस्य दुःखस्याभावरूपत्वाविशेषेणानुभवतीति चेत्तर्हि प्र
तियोगिनिरपेक्षतया दुःखरूपमानस्याभावरूपानंदस्याभावरूपत्वाविशेषेऽपि समानमेतद्दूषणम
इति विशेष एव तवाधिक इत्यर्थः। ननु नारकाद्यात्मनां दुःखाभाव एव सुखानुभवगोचरः। न तैरपि स्ना
नादिदुःखसाधनविगमे प्राप्तदुःखाभावमात्रमनुभूयते ननु तदेव सुखं। सुखार्थमन्नपानादिसा

धनविशेषोपादानादविवेकानुकास्यचित् सुखाभिमान इति संतोष्टव्यं अन्ये तु नारकाद्यात्म
दुःखस्यापचयांशक आकाशस्येव महत्त्वे दृष्टान्तादित्याह। तर्हि प्रतियोगिनिरपेक्षत्वमस्तु भावत्वं च ननु
विघातिकादोषस्तत्त्वाच्च विपक्षबाधकतर्काभावादप्रयोजक इत्याशंक्याह प्रतियोगीति। एवं चानंदस्य
भावरूपत्वे प्रयोजकत्वमित्याह। किंचेति। ननु निवर्त्यदुःखं यदपकृष्टतरं तदपि तदा तन्निरूप्यमपि सुखे ब
ह्वाभिमानस्तदल्पत्वं तदाल्पत्वाभिमान इत्येतावन्मात्रेण न तु सुखस्य स्वरूपेण सातिशयत्वमस्त्यता
सिद्धिरित्याशंक्याह। न चेति। निवर्त्यदुःखस्याल्पत्वेऽपि सुखातिशयादर्शनादित्यर्थः। एतदेव स्पष्टयति
क्लेशाबाहुल्य इति। ननु मास्तु स्वरूपासिद्धिस्तथापि सुखेतरत्वोपाधिकृतत्वान्न सातिशयत्वस्य भावरू
पत्वेन व्याप्तिरस्तीत्याशंक्याह व्याप्तिमुन्नयति। इदमित्याकूतं न सुखेतरत्वं तावदुपाधिः साध्यस्य
मव्याप्तिकत्वात्तथा हि यद्भावरूपं तत्सुखेतरदिति यद्यपि साध्यमव्यापकत्वमस्ति तथापि यत्सुखेतर ॥३

तद्व्यापकरूपमिति न व्याप्तिरहितघटाभावादौ व्यभिचारात् । ननु साधनाव्यापकत्वे सतीति साध्यव्यापक एवोपा
धिर्न तु साध्यसमव्याप्तिर्न तत्र सति प्रसिद्धानुमानस्यापि सोपाधित्वप्रसंगात् तथाहि पर्वतोग्निमान् धूम
वत्त्वान्महानसवदित्यत्रापि पक्षेतरत्वमुपाधिः स्यात् यो धूमवान् स पक्षेतर इति साधनाव्यापकत्वं
तावदस्य नास्ति पक्षस्यापि धूमवत्त्वात् योग्निमान् स पक्षेतर इति साध्यव्यापकत्वं चास्ति पक्ष
स्याप्यग्निमत्त्वानिश्चयात् एषोपाधिलक्षणे निष्कर्षः श्लोकः । एकसाध्यस्य विनाभावे मिथः संबंधयुग्म
न्ययोः । साध्यस्याभावाविनाभावी स उपाधिर्यदत्ययः इति सतावत्स्थितं व्याख्यानं । यदत्ययो यस्याभावः
साध्याभावे नाविनाभावी व्याप्तः स उपाधिरुच्यते यथा सत्यामो मित्रातनयत्वात् गर्भस्थमित्रातनयवत्
दित्यत्र शाकाद्याहारपूर्वकत्वमुपाधिः साध्यस्य श्यामत्वस्याभावे नाविनाभावि त्वयत्वात् ननु तार्किका
हो नित्यः सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वात् घटवदित्यत्रापि कृतकत्वमुपाधिः स्यात् यदनि
त्यं न तत्र वर्तते तत्कृतकमपि न वर्तते इति साध्यस्यानित्यत्वस्याभावे नाविनाभाव्ययत्वात् न च प्रवंसस्य
त्य

विचारः । प्रागभावे सतीति सत्ता समवायविलक्षणत्वात् कृतकत्वस्य प्रध्वंसे चत्त्वाभावादिति न वत्वेवकृतकत्वमु
पाधिः । तन्निरासायोक्तं मिथः संबंधयुग्मन्ययोरिति परस्परसंबंधयुग्मन्ययोर्मध्ये एकत्वय इति संबंधः । इह
च यत्सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वं न तु कृतकमिति संबंधस्याविनाभावस्य सद्भावादनुपा
धित्वे एकेन पदप्रमुक्तहेतुना साध्येन सह साविनाभावे सतीति स्वरूपसंकीर्तनं नलक्षणं व्यावर्त्याभावात्
एतदुक्तं भवति साध्यस्याभावाविनाभाव्यत्ययः उपाधिरिति अत्रोच्यते ॥ नेदमपि लक्षणं सम्यक् न मनोनु
रंकमीश्वरानुमाने शरीरजन्यत्वस्योपाधितापातात् अतिव्यापकत्वात् । ननु सकर्तृकत्वे शरीरजन्यत्वे
योन्यास्ति व्याप्तिर्बोधकतर्काभावात् कथं बाधकः कथं व्याप्त्यनुपपत्त्या तेन किं व्यभिचारशंकानिराकरणे
नाकिंचोपाधिशंकानिराकरणेन । यथा यत्तत्र उपाधिलक्षणपरीक्षणेन मनस्खेदनीयं । व्यभिचारद
र्शनमात्रेण व्याप्तिग्रहणे संभवात् बाधकाच्च शंकानिरासः । यदि द्वितीयस्तदा चक्रकापत्तिर्निरुपाधित्वल ॥ ५
क्षणसिद्धेः तन्निराकरणेन बाधकस्य व्याप्यप्रयोगित्वे सति चतस्मिन् निश्चितत्वे तदभावादव्याप्तिस्तन्नोपा

पार्थिवलक्षणासिद्धिरिति। अन्ये त्वाहुः निरुपाधिकसाध्यसाधनसंबंधं विना व्याप्तेरसिद्धेः सत्त्वपार्थिवलक्षणासि
व्यतिसिद्धेश्च तस्मिंस्तु सिद्धिरिति। तदप्यसत्। अप्रसिद्धानुमानेऽपि सपक्षस्योपाधिप्रसंगात् पक्षोपादानस्या
सत्त्वामहत्त्वादि तदप्यसत् तत्साधनव्यापकत्वात् परिदृश्यमानमेव तन्नयत्वस्य ज्ञाकाद्यासरपरिणात्मा
व्याप्तिमुपलक्ष्य देशांतरवर्तिन्यपि तदनुमानात् न चाहारविपर्ययशंकया व्याप्त्यनिश्चयस्तथा सति
कार्यत्वस्यापि सकर्तृकत्वेन व्याप्त्यनिश्चयप्रसंगादिति। यदाप्रसिद्धोपाधेरप्येतादृशी गतिस्तदा शं
किनोपाधिपरिज्ञानाभावादत्र एव जलांजलिः सर्वानुमानोच्छेदश्च निर्बीजोपाधिवद्रूपस्य सर्वत्रापात
संभवात्। तदेवमुपाधेर्दुर्निरूपत्वादप्रामाणिकत्वाच्च लिंगलिंगिनोः संबंधो विनाभावो व्याप्तिरिति
वोच्यत इति स्थितं। ननु तथापि सातिशयत्वं न तावद्रूपत्वे प्रयोजकं निरतिशयस्याप्याकाशादेर्मा
रूपत्वान्नाऽसपक्षैकदेशस्यापि गमकत्वात् धूमवत्त्वादिवत् सातिशयस्यापि नावश्यनाशापगमे

नाशस्यापि सातिशयत्वापातस्तस्मात् सिद्धं सातिशयत्वेन नाशरूपत्वं। किंचात्मविशेषगुणत्वं सुखस्यास्याप
गम्या नावतां ब्रुवाणः कथं कृत्यमतिपुनापत्रपेत। तदेवं लोके नावात्र याहि लोके कार्यं दुःखसंतिनं
च सुखं दृष्टं स्नानपानमपि तच्चपेवेत्यकुरूपार्थत्वप्रसंगो मोक्षस्येति चोदयति बाधकादन्यथात्वमिति प
रिहरति न तन्निरूपणादिति अयं भावः कार्यत्वे तावत्तु सुखस्य न प्रमाणमस्ति साधनोपादानानुप
पत्तिः प्रमाणमिति चेन्नाभिलषितत्वेनाप्युपपत्तेः। कृपाकाशाकारकव्यापारवन्नेच तद्देवसदा
वस्थानप्रसंगः। सुतकर्मापि स्थापितं तद्धारणं दृष्टविशेषे प्रतिबंधनावस्थानित्यकोऽरंगीकारात्तु नन्व
यं नकापगमे प्रतिबंधस्थितिरस्तिकश्चितु ततु सुखस्य तावेचिच्यादेव च सातिशयत्वप्रतीत्यापप
त्तेः साधितानुकार्यत्वं गमयति सुखं कार्यं विभुविशेषगुणत्वाच्छब्दवदिति चेन्नासिद्धत्वाद्धेतोर्नित्यत्व ॥५॥
सुखस्य हमिति प्रतिभासो गुणत्वे प्रमाणं दंसादौ बाधश्चेति चापातु नाप्यसुखं गुणः पदार्थपंचकव्यतिरि

क॰ वसानिद्रयपरतंत्रत्वान्नृपादिवदिति प्रयोगो गंतव्यः। हेत्वसिद्धेः साधयिष्यत्यात्मनः सुखत्वं पारतंत्र्या
त्प्रतिज्ञासस्य सुखस्य सुखविषयत्वेनोपपन्नत्वाद्यधिकरणासिद्धश्च। किंच कल्पितकार्यत्वादिसाधने साध्यस्य
कार्यत्वादिसाधने वासिद्धसाधनं वास्तवकार्यत्वादिसाधने नो विकल्प्य तस्मात् कार्यत्वप्रमाणाभावात् सुखं ना
तमित्यादिप्रतिज्ञासस्य घटाकाशवत्त्वादिप्रतिज्ञासवत् भ्रांत्याप्युपपन्नो सुखस्य कार्यत्वेन लोकोपि सिद्ध
यश्च दुःखसंभिन्नत्वेनोक्तं तदपि न न लिप्यते लोकदुःखेन बाह्य इत्यादिश्रुतेस्तस्माद्बाधकानिरूपणात्
ब्रह्मण्यपि स्वरूप एवानंद इति बाधकांतरशंकते आत्मलाभावइत्यादिना रागनिबंधनात् प्रवृत्तिरन
नर्थमूलमिति नथ्याप्तिः किंतु यद्रागनिबंधना या प्रवृत्तिः सानर्थमूलत्वेनापेक्षितेति भावः। कश्चित्तु मिलि
द्वगोचरत्वमेवानर्थमूलत्वे प्रयोजकं तथा च ब्रह्मानंदे रागात् प्रवृत्तिरपि तन्मात्रहेतुर्भवतीति संसारा
य। प्रत्युत संसारविरोधि मुमुक्षुरागस्येति परिहरतीति मे वा भाति। ननु ब्रह्मानंदस्य परमत्वे प्रमाणा
भावात् परमानंदकोपि सांसारिक एव सुखविशेष इति शंकापरिहारे तत्प्रमाणमाहुः इति तादृश एव श्रु

त्यतः प्रयोजनः स्पष्टार्थः तत्र मनोरथमात्रमेतदुनाशेषसाधनचतुष्टयसंपन्नोधिकारिविशेषस्तथाहि नित्या
नित्यवस्तुविवेकस्तावन्न संभवति तत्कारणाभावात् वैराग्यादिकमपि सर्वेष्यता वन्न कस्यचिदिति प्रमी
यते सर्वस्याप्नीतिः सर्वथा मधिकारप्रसंगः। अथ निरधिकारस्य मोक्षशास्त्रस्य वैयर्थ्यप्रसंगाद्विशिष्टाधि
कारिलाभः। न सर्वाधिकारत्वं संभवात्र त्राह तादृश एवेति साधनचतुष्टयसंपन्न एवाधिकारी मोक्ष
शास्त्रे इति भ्रांतो न सर्वाधिकारं मोक्षशास्त्रं रामायणादिवच्चित्तस्य मोक्षशास्त्रप्रवृत्त्यनुपपत्तेस्तथा चश्रु
तौ तदर्थे स्वकर्मनिरतेत्यादिना नित्यानित्यवस्तुविवेकादर्शितः। परीक्ष्य लोकानिति वैराग्यमुक्तं शां
तो दांत इति शमदमादयोदर्शिताः सर्वत्र फलश्रुतयः काम नोत्पादनद्वारेण मुमुक्षोरधिकारप्रदर्शना
र्थाः तत्र नित्यानित्यवस्तुविवेको नाम मानुषानंदादारभ्य ब्रह्मलोकपर्यंतानंदानामनुभवादिरूपस्त्रा
करपर्यंतानर्थरूपाणां साधनोपकरणतदाभास्वचतुर्दशानुभवनसहितानां सावयवत्वचक्रितत्वादि ॥ द्द
इत्यादिकार्यत्वात् धारणापूर्वकमनित्यत्वं ज्ञानकार्यस्य कारणत्वानुपपत्तेरविरक्तो निरवयवं नित्यमेक

कारणमस्तीति नित्यानित्यवस्तुविमर्शविवेकज्ञानं। इहामुत्रार्थफलभोगविरागो नाम मनुष्याद्यादिस्थावरांतानर्थे
कुसुमावतंसवनितास्रक्चन्दनादिप्रसला कांतेष्वानंदघनित्य चातु तत्रार्थसाधनानुष्ठानजनितायासस्ते
नेपाङ्गोगाद्भिन्नकार्यादिव्यापारजनितदुःखमिश्रत्वादियोगोपि कालं च दुःखहेतुत्वानुपरिच्छिन्नत्वाच्च
दुःखप्रायत्वान्नाकदुःखवद्दर्शिविवेयोगो नरकवतीति निश्चयपूर्वकं वर्तमानशरीरस्थितिहेतुभूताप्रतिनि
अन्नपानादिव्यतिरिक्तविषयप्रवृत्तिकारणाद्याविरुद्धो निश्चयलक्षणो विशेषः। शमो नाम तत्कारणस्या
पराणां प्रतिनिधिनामपि लौकिकानां स्वाधिकारं प्रत्यनुपयोगिनामफलत्वावधारणपूर्वकः परित्यागो।
दम इति च बहिःकरणानां पराणां मुकुलक्षणानां परित्यागः। उपरतिरिति च वैराग्यादेव कामानाया
काम्यकर्मादिकारानित्यक्तो परिज्ञाया नित्यानां कर्मणां विहितः श्राद्धानां सत्त्वशुद्धिद्वारेण विविदिषाफ
लसिद्धौ कलप्रयोजनलक्षविनाशस्यैव विधितएव परित्यागः॥ तितिक्षुत्वं नाम शीतोष्णादिद्वंद्वानांख्या
विकारानिर्हृत्यपेक्षितजीवनविच्छेदहेतुव्यतिरिक्तानां सहिष्णुता। समाधानं नामोक्तप्रकारेण सर्व

व्यापारोपरमे श्रवणे प्रवृत्तिस्तत्र बलाद्यन्मनोराज्यविधित्सितश्रवणादिविघ्नजनप्रतिकूलनिद्रालस्यादि
विरोधेन चेतसोऽवस्थानं। एतैः सर्वैः संपन्नत्वं शमादिसाधनसंपत्। विद्यमानपदार्थस्य स्वसत्ताप्रयुक्त
व्यवहारकार्यप्रतिबंधको बंधः। यथा वस्त्रादीनां पाशादिसंबंधो योगो मोक्षः। एवमात्मन्यपि देहद्वयव्यतिरिक्ते
सत्यज्ञानस्वरूपाद्वयब्रह्मस्वरूपस्य स्वसत्ताप्रयुक्तव्यवहारकार्यप्रतिबंधकाध्यात्माधिभूताधिदैवतात्मको बंधः। तस्य सनि
दानस्य निवृत्तिर्मोक्षः। तद्विषयेच्छा मुमुक्षुता तद्वान् मुमुक्षुर्वै तस्मादिति शिष्टाधिकारी संभवात् सर्वाधि
कारं मोक्षशास्त्रमिति भावः। किंच स्थूलार्थविषयमपि तावच्छास्त्रं न सर्वाधिकारं नहि व्याकरणज्ञानका
मो व्याकरणप्रवर्त्तने नापि साधुशब्दज्ञानार्थी ज्योतिःशास्त्रे किमंग पुनरिदमतिसूक्ष्मार्थविषयं
न सर्वाधिकारमित्यभिप्रेत्याह न चेति तस्मान्मोक्षशास्त्रस्याविशिष्टाधिकारित्वात्तस्य च स्वकामित
मोक्षसाधन एव प्रवृत्तेस्तद्विरुद्धसंसारप्रवृत्तिविरुद्धैव। न स्वकुशलकामो गीर्भिर्दहनमुपसर्पति ॥१७
ततो ब्रह्मणि तावद्रूपानंदावाप्तिपगमनमपि न संसारप्रसंगो बाधक इति रूपहेतोदोषपरिहृत्यपरस्परदोष

प्रसंगं भेत्तुं पूर्वोक्तमनुवदति यस्त्वेवमपीति कथमित्यस्य भावः किं च रूपार्थविषयमपि तावच्छास्त्रे कथं ताव
यत्तु नाम दर्शनं स्थितिरिति संबोधरहितः स्वपरपक्षरहस्यानभिज्ञ इत्यर्थः। यथादर्शनं प्रकृतौ यथास्थितात्म
यदर्शीत्यर्थः। विमताः प्रवृत्तिः संसारबीजं द्वेषनिबंधनप्रवृत्तित्वात् विप्रहननादिप्रवृत्तिवदित्युक्तो हे
त्वसिद्धिं शंकते ननु तत्रैव चायादिति यद्यदार्थसाधर्म्यवैधर्म्यपरिज्ञानवतां अनित्यसंसारानित्यत्वादिज्ञान
उद्वेगः। मिथ्याज्ञानहेतुको निस्तत्त्वायनविषयस्तद्वेष इति विरागो सिद्धो हेतुरित्यर्थः। रागनिबंधन
प्रवृत्तित्वादित्यप्यसिद्ध एव न हि हेतुरित्याह अत्रापि तदीति सिद्धिर्णयगर्भपर्यंतकर्मसाध्यमनंदस्यानित्य
त्वादिदोषदर्शनं परमार्थदर्शनं तन्निदानं कारणं यस्याः। ननु परमानंदेच्छायाः प्रवृत्तिरित्युक्तो रागादेव
प्रवृत्तिरित्युक्तं भवति मोक्षे कथमित्याशंक्याह न हीच्छामात्रमिति प्रमाणानुसारिणी हि तत्त्वायनविष
याचेतोवृत्तिरिच्छा मिथ्याज्ञानहेतुका सैव चेतोवृत्ती राग इत्यर्थः। रागस्य मिथ्याज्ञानहेतुकत्वमाह स्मृत्यादि
दृष्ट्या निश्चत एव तिः। अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः इत्यभिधायाविदितं अविद्याक्षेत्रमुत्तरेषां

प्रसुप्ततनुविच्छिन्नोदाराणामिति अस्य चास्य सूत्रस्यायमर्थः। संक्षेपतः अविद्या क्षेत्रं प्रसवभूमिरुत्तरेषां अस्मिता
दीनां प्रसुप्ताश्च ते तनवश्च ते विच्छिन्नाश्च ते उदाराश्च तेषामिति विग्रहः। तत्र प्रसुप्तिर्नाम चेतसि शक्तिमात्र
प्रतिष्ठा भावः। प्रसंख्यानवतो हि क्लेशबीजस्य संमुखीभूतेऽपि विषये नैषामभिव्यक्तिरस्ति दग्धबीजत्वात्
प्रबोधस्तु उच्यते प्रतिपक्षभावनोपहता हि क्लेशास्तनवो भवंति ते च विच्छिद्य विच्छिद्य तेन तेनात्म
नासमुदाचरंतीति विच्छिन्ना उच्यंते रागादिकाले क्रोधस्यादर्शनात् विषये योऽलब्धवृत्तिः स उदारः सर्व
एवामी क्लेशा अविद्याभेदा एव विपर्ययकाल एवोपलंभादिति। एतेषां स्वरूपमुक्तं अनित्याशुचिदुःखा
नात्मसु नित्यशुचिसुखात्मख्यातिरविद्या आत्मानात्मनोरस्मात्मायः पिंडवत् संश्लेष इव भासोऽस्मि
ता। सुखतत्साधनलोभो रागः दुःखतत्साधनद्वेषो द्वेषः सर्वस्य पात्माशीर्मा न भूवं च भूयासमिति अभि
सोऽभिनिवेश इति यस्माद्रागनिबंधनप्रवृत्तित्वादित्यस्यासिद्धता ज्ञानरूपानंदास्फपगमेऽपि न संसार ॥८
प्रसंगः। तस्मादित्युपसंहारः। एवमानंदपदं व्याख्याय आत्मानमिति द्वितीयपदं व्याख्यातुमापातनिकां क

रानिब्रह्मेति नेति किं चानंदरूपप्रत्यगात्मा ऽभिन्नं चाज्ञायं परमात्मानंदस्वभावः। कुतो ऽभेद इत्यत आह तत्वम
सीति प्रत्यगात्माभिन्नोपि परमात्मा अनानंदस्वभावो न च तु यथा शुद्धबिंबाद्भिन्नमपि प्रतिबिंबं न शुद्धं तत्रा
ह न स्वल्पानंदात्मन इति एकस्यैवानंदरूपत्वा[...]नंदरूपत्वविरोधस्तत्र तिबिंबमपि स्वरूपेण शुद्धमेवाशु
द्धिस्तूपाधिगता त्वमादेवावभासते

भावनात्यप्रत्यपेक्षितत्वानुक्तोसं भावितः प्रतिज्ञायामेकः साध्यतहेतुना। न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो
नहि तेन तावदशायोज्ञातिव्यक्तो वेदात्स्यपगमान्नापि पूर्त्रिमः कार्यत्वगुणत्वास्यां॥ अत्रोच्यते। व्यक्त्यभेद एकत्वा
पतेतत्वकार्यत्वगुणत्वे सुखस्य निभागेवात्यधीयि किं च यस्यैकरसचैतन्यमेव सुखं विज्ञानमानंदं ब्रह्मेत्या
दिश्रुतिसिद्धं कथं तं प्रतिसिद्धं च सामान्यविशेषभावमुररीकृत्य विकल्पकलंककलावलेपावकल्पते।
ननु सिद्धा लोके जातिव्यक्तिभावः सुखं सुखमिदं सुखं कलत्रसुखमित्येकाकारप्रत्यवमर्शी गौर्गौरित्यादि
वं त्वनिरूपाधिकव्याप्तिभेदसिद्धेरेकाकारप्रत्यवमर्शस्याकाशादाविव व्यक्त्यैक्यनिबंधनत्वेनाप्युपप
त्तेरितरथा घटाकाशो मठाकाश इत्याद्येकाकारप्रत्यवमर्शाज्जातिव्यक्त्यादिभावप्रसंगात् नास्तीत्युच्य
तेव्यमाने येन दिगादिवदेकाकारपरामर्शो व्यक्त्यैक्यनिबंधनः स्यादिति चेदुच्यते तस्य वेलापिव्य
तिरेक्यमानमनुमानं विमतं सुखं स्यातो द्वितीयं चावच्छेदकोपरागमंतरेण आकाशमानभेदचाघट ॥९
वं तद्द्वयं यथाकाशं तथा चेदं ततस्तथेति तस्मात्सुखव्यक्त्यभेदस्य साध्यमानत्वात् संतवत्यप्रतिराध॥

ननु तथापि परमप्रीतिविषयत्वे प्रमाणाभावादसिद्धो हेतुरित्याशंक्याह नन्वयमसिद्ध इत्यादिना न केवलं लो
कानुभव एव प्रमाणमात्मनः प्रीतिविषयत्वे पक्षित्रिपथ्यविषयत्वेन पुत्रवित्तादेरुपादानानुपपत्तिरित्याह क
थमन्यथेति नन्वानंदार्थं लौकिकाः पुत्रादिकमुपाददते न त्वात्मार्थं ततो नात्मा प्रीतिगोचर इत्याशंक्याह नसुख
स्यानंदमपीति श्रुतकर्मोपस्थापितविषयाविशेषसंपर्कजनितात्मसुखस्याभिव्यंजकत्वेन त यानुक्रान्ति
प्रीतिशब्दपर्यायत्वेनोक्तिर्लौकिकानां नंद इत्युच्यते तमपि न स्वरूपतः प्रार्थयंते किं तु स्वशेषत्वेनान्यथा
स्वशेषत्वाभावे सुखस्य स्वरूपतो विशेषाभावे न स्वपरानंदयोर विशेषः प्रसज्यते यदा तस्याप्यात्मशेष
त्वेनैव प्रियत्वं तदा किं वक्तव्यं तत्साधने पुत्रादौ तस्मात्सर्वस्यात्मार्थत्वेनैव प्रियत्वादात्मनः पुनरनन्यशेष
त्वान्निरतिशयप्रीत्यास्पदत्वं सिद्धं उक्तेर्थे श्रुतिं प्रमाणयति तत्र वर्तिवाक्येनैनं तु प्रत्यात्मार्थत्वेन सर्वस्य
प्रियत्वमुक्तमनेनात्मनो निरतिशयप्रियत्वं तत्राह यद्यप्यर्थमिति एवं स्वरूपासिद्धिं परिहृत्याप्रयोजक
त्वशंकोत्तरत्वेनैवमित्यादिना परमानंदस्वभाववत्वाभावे परमप्रीतिगोचरत्वमेवस्यान्नारकादिवदिति वि
पक्षबाधकं वक्तुं परिशेषमाह नन्वित्युच्यते न तावदित्यादिना आत्मनः प्रियत्वं दुःखतत्साधनत्वेनापरुषो

यत्वेन दुःखात्तावत्तया सुखसाधनतया वा मात्रं तथापि सुखमात्रत्वेन नत्वत्युत्कृष्टोस्य परमानंदस्वभावत्वमि
त्याशंक्याह सुखगोचरश्च प्रेमेत्यादि इति लौकिकसुखविषयात्प्रेम्णः सकाशादधीयमतिशयोपेतः प्रेमा स सुखा
धिक्यात्तस्मात् दृश्यते सार्वभौमादिस्थाने स्थितियतो नो निरतिशयो यमात्मनि प्रेमा अतः निरतिशयानंदरूपतास्मिन्वा
त्मन्यवतासमानेव कल्पते इत्यस्यरूपतथामित्यन्वयः कथमात्मविषयस्य प्रेम्णो निरतिशयत्वमित्यतो विशि
नष्टि सकललौकिकसुखप्रेमातिशायीति सकलो यो यं लौकिकसुखप्रेमा तमतिशेते अतिक्रम्य वर्तते इति
तथोक्तः सर्वस्य सोपाधिकत्वादात्मविषयस्य च प्रेम्णो निरुपाधिकत्वादित्यर्थः आत्मा या कथमनतिशयान
न्दरूप इत्यत आह सर्वानंदातिशायित्वेनेति सर्वानानंदानतिशेत इति तथोक्तः तस्य भावस्तेन नको प्यान
न्द आत्मन उत्कृष्टोस्तीत्यर्थः एतदुक्तं भवति यत्र यत्र सातिशयः प्रेमा तत्र तत्र सुखातिशयो दृष्ट आत्मनि
तु निरतिशयो यं प्रेमा निरतिशयानंदस्वभावत्व एवोपपद्यत इति ननु सोच्छेदमपि कामयमानः कश्चिदु
पलभ्यते ततः प्रियत्वं दुःखः कृतस्तां प्रियतमत्वेनानतिशयानंदरूपतेति ॥ उच्यते तदपि प्रियस्यैव ॥१०
साधकं नहि कश्चिदप्यपि दुःखं न सहते अत आत्मनः प्रियत्वादेव तत्र दुःखमसहमानः उच्छेदं तदुच्छि

10

संतोऽप्यर्थं तदेवमित्याशंक्य किं च जीवात्मनः प्राक्तनः स्यपदार्थः जीवाः परमात्मनो भिन्नाः
याय द्विरुद्धधर्माक्रांतः सततो भिन्नत्वाद् भिन्नमिवदहनादित्यत्र यथा वह्निरिकत्वेन साधने सिद्धसाधनं तद्विरुद्धधर्माक्रांतत्वा
कत्वेन साधने त्र्यप्रमात्मनोऽप्रसिद्धत्वादिति विरुद्धकालात्ययापदिष्टत्वं अनिविद्यादिभिरनैकांतिकत्वं चो नामि
दानीं श्रुत्यनुमानं चाह किं च जीवाः परमात्मनः इति न च अनुमानं तेषां अत्यनुग्राहकस्तर्क विशेष इत्यत्रोपश्रु
त्वे त्रेवमुरुपार्थं तावाद्वितीयाद्वैतयमिति च सारूप्य पुरुषार्थतानित्वनादर्थयोत्यादेवतानुपपन्नः
तिनिंदनाच्च तदेतात्पर्यात्तावाद्वत्व्रातविरोधः नन्वयपपीश्वरादभिन्नाः जीवाः तथापि परस्परं विलक्ष
णत्वं तावाएवेति पूर्वोक्त माशंक्याह परस्परं चेति एवं प्रत्येकमित्यस्यायमर्थः विमतं सर्वं सचक्षुरविवादा
स्पदस्य रूपग्रहणसाधनं चक्षुष्ट्वाद् यदेवं तदेवं यथा अन्यथा वायवविवादपदं तथा चेदं तत्तस्माद्येति विमतं
सर्वं रसनेन्द्रियमविवादास्पदस्यैव रससग्रहणसाधनं रसनेन्द्रियत्वाद् यदेवं तदेवं यथा अन्यथा वायवविवाद

कल्पयति

पदं रसनेन्द्रियमित्यादि प्रयोक्तव्यमित्यादि नात्र तत्तत्कर्मोपार्जितत्वमुपाधिरिति विवर्जितमन्यत्र नन्वायतन
त्वमिंद्रियत्वं वास्तवमात्वेनेदमित्युत्वेनात्मत्वेन भोगसाधनत्वं च न विप्युति विपक्षे बाधकाभावादप्रयोजकत्वमि
शंक्याह विपर्यये चेति त्र्ययमाशयो न तावदयमात्माणुः सकलशरीरव्यापिवेदनानुसंधानानुपपत्तिप्र
संगान्नापि मध्यमपरिमाणो निरवयवत्वाद् गगनवत् शरीरोपाधिपरिच्छिन्नो व्यापक इति आकाशवत्सर्वगतश्चात्म
त्यात्मेति श्रुतेश्च स चैकः परस्यापि संमतः यो हि बहून् कल्पयति स चैकमिति न्यायात् नैवैकं न सर्वेषां
भोगायतनत्वाद्यनुपपत्तिर्वास्तवात्मभेदकल्पने गौरवमेव बाधकं यथाकाशस्यैकत्वेऽपि कर्णशष्कुली
भेदोपलंभानुपलंभव्यवस्था यथा वा दिगेकत्वेऽपि प्राच्यादिव्यवस्थादित्यसंयोगोपाधिकत्वेनादेव
यथा वा कालस्यैकत्वेऽपि मुहूर्त्तयामाहोरात्रादिव्यवस्था कल्पिता भेदादपि नानारूपे यत्नार्किकैस्तु
यदि भिन्नाः किं न विप्यतीनि ननु सर्वशरीरव्यापकात्मन एकत्वे अनुसंधानं न नियतं न चोपलभ्यते तोनित्या
एवं प्रतिशरीरमात्मान इत्याशंक्याह अननुसंधानं चेति शरीरवस्तु वीतरागत्वे वेदनानुसंधानं मोपा ॥११

धिकत्वे दवशेनोपपन्नं तद्विज्ञातिमिति तदास्तव वेदसाधकं यथैकस्मिञ्छरीरे तोऽकुरके चैपि शिरोवच्छिन्नात्म
प्रदेशागतवेदनानुसंधानं पादावच्छिन्नात्मप्रदेशस्य न तु भवति विशिष्टानां स्मिन्नत्वादित्यर्थः। ननु
यथैकस्मिञ्छरीरे स्वरूपस्यैकत्वात्पादमे वेदना शिरसि मे वेदनेत्यनुसंधानं दृश्यते तथा हापि विशिष्टा
नामनुसंधानात्तावे पि स्वरूपं चेदेकं तर्हि अनुसंधानेन तु वितथमेवास्य वस्तुरूपस्यानुसंधानं सर्वसा
क्षित्वात्तु ब्रह्मणः तिर्दोत्ते हि यथा पादतलकंटकास्फटनायकरव्यापारो दृष्टः तथैवापि देवदत्तवेदना
परिहाराय यज्ञदत्तादिशरीराणां प्रवृत्तिसांकर्यं स्यादित्याशंक्याह परमेश्वरस्यैवेति एकस्मिञ्छरीरे
स्वरूपस्यानुसंधातृत्वेऽपि बाधकत्वे तेनागार्थवेदनापरिहारे प्रयत्नः परमेश्वरस्य सर्वस्य तस्यात्तोऽर्क
वान्नवेदनापरिहाराय प्रवृत्तिसांकर्यमित्यर्थः। ननु पूर्वं सर्वाणि शरीराण्येकस्य तेनायतनानीति प्र
तिज्ञातं किमिदमुच्यते नैकस्यानुसंधातृत्वेऽपि गोऽस्तीति नायं दोषः तत्रापि सुखदुःखाद्यनुभविविशिष्ट

त्वोक्तं शरीरस्वरूपैकस्यैव प्रसाधनान्यस्य चाविक्रियस्यात्वोक्तं चोत्तरं यथा च श्रुतिः एको देवः सर्वभूतेषु गूढः स
र्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥ इति सर्वभूतान्तरात्म
नः साक्षित्वे केवलं दर्शयति। ननु विरुद्धमिदं त्वोक्तं एकस्वरूपं न च तज्ज्ञोक्तं भवतीति नैतद्वक्तव्यं तत्सु स्वरू
पाणामिति प्रतिबिंबानां रूपाणां दोषमलीमसत्ववदत्वोक्तं ब्रह्मस्वरूपाणामपि जीवानामन्तःकरणानीत्यु
पाधेस्त्वोक्तं चैतद्विज्ञानीति। यदापि विशिष्टदायस्वरूपस्यैकत्वे गादृतिमतं तदापि न दोषः एकशरीरसमा
श्रितत्वे नैकमनोधिष्ठेयत्वेन चैकरणाद्यथा परोपपन्नेनान्यत्र तद्दृशा वादनाद्यनेकलिंगसंततिविशिष्ट
दारकप्रतिनियतानेककर्मवत्त्वाच्च न सांकर्यप्रसंगः इदानीं प्रतिज्ञासमानत्वोक्तं वेदस्यतादि कांशे पराक
रोति किं चेत्यादिना। ननु स्वशरीरसमवेतत्वेऽहासमानचेष्टांतरदर्शनात्परशरीरे आत्मनि नानात्वं प्रदनु
मीयते सत्यानुमीयमानात्ताहमित्यनुमीयते कोऽर्थः यथात्मतया नानुमीयते तदातिरात्मकानि देहान्तराणि॥१२
स्फः यद्यनुमानसंविदि ग्राहकतया नानुमीयते तदाप्यग्राहकत्वमपि नानुमातुं शक्यते चेष्टा या आत्म

मात्रलिंगत्वेन विपरीतानुमापकत्वायोगादयं भेदो नानुमीयते न भेदेऽनुमानस्योदासीनत्वात् तत्र चानुमेयत्वाद्
वसे भेदे ह्यव्याप्तिग्राहकानुमानाद्यो व्याप्तिबलात् नन्वनुमानेन प्रतियोगिसिद्धौ प्रत्यक्षादेव ततो भेदः तथापि
भेदानवगमात्तद्विशिष्येत्याह न चानुमानादिति परशरीरगतस्यात्मनः परप्रत्यक्षत्वे नास्ति प्रत्यक्षत्वे नास्ति
प्रत्यक्षाप्रत्यक्षसमुदायस्य च प्रत्यक्षत्वं नोपपद्यत इत्यत्र किमिदानीं प्रत्यक्षत्वमङ्गीकृत्याह उपपन्नोऽपीति
प्रत्यक्षाप्रत्यक्षसमुदायस्यापि भेदस्य प्रत्यक्षत्वोपपन्नत्वेऽपि प्रकृतानुमानाप्रतिपन्नत्वान्न विरोधः प्रकृता
विरोधित्वमेव कुतः सार्वकालिकबाधस्याभावलक्षणस्य तात्त्विकत्वस्य प्रत्यक्षीकर्तुमशक्यत्वाद्वर्तमानसंप्र
युक्तमात्रग्राहकत्वात् प्रत्यक्षस्य ॥ ननु कस्तर्हि यदि प्रत्यक्षेण सार्वकालिकबाधा यावत्पुर्यं नाम तात्त्विकत्व
मात्मभेदस्य गृहीतं तदा तन्निषेधेऽनुमानस्य तद्विरोधप्रसङ्गवदप्रामाण्यं न च तदस्तीति। ननु प्रतीयमाने
भेदे यदि कदाचिद्बाधः स्यात्तर्ह्युपलभ्येत न चोपलभ्यते; तस्मात्तदभावो निश्चीयत इत्याशङ्क्याह न च कालां
तरादि वर्तीति न तावदनुपलम्भमात्रात्तदभावनिश्चय इति प्रसंगात् किंतु योग्यत्वे सत्यनुपलम्भात् तान्तच कालांत

रत्ताबाधाय इदानीमनुपलम्भं योग्यो येन योग्यत्वे सत्यनुपलम्भात् प्रतीयमाने भेदे सार्वकालिकबाधस्याभावो निश्ची
यत इत्यर्थः। तस्मात्प्रत्यक्षेण तावत्प्रमाणेन तात्त्विकभेदग्रहणाभावात्तद्विरुद्धमनुमानं न च यदुक्तं विमतो भेदः
प्रत्यक्षो न भवति प्रत्यक्षाप्रत्यक्षसमुदायधर्मत्वाद्द्वित्ववदित्यस्यानिसंयोगवदिति तत्रासिद्धो हेतुः स्वरूपमेव भावानां
भेदः पदार्थस्वरूपमेव भेद इत्याकराः तत्राह न च स्वरूपमेवेति सापेक्षस्याश्रयान्यत्वे सत्याकांक्षा
रूपकः प्रतियोगिस्वरूपत्वे च भेदस्य तद्रूपत्वं प्रसज्येत इत्युक्तं स्पष्टयति न हीत्यादिना अन्यनिरपेक्षं
स्वरूपमुच्यते भेदस्तु नियमेनान्यसापेक्षः प्रतीयतेऽतो निरुपाधिकविरुद्धधर्माक्रान्तत्वान्न भेदस्वरूपयो
रैक्यं संभवतीत्यत्र हेत्वन्तरमाह किं चास्मिन्मत इति घटनेतेष्वेकं पदं सामान्ययोगात्प्रवर्तेत यथा गवादि
पदं विशेषणयोगाद्यथा दण्डादिपदं उपलक्षणयोगाद्यथा पाचकादिपदं न तावत्तु स्वरूपभेदवा
देऽनेकेषु घटेष्वेकस्याभिन्नपदस्य प्रवृत्तौ सामान्यं निमित्तमस्ति परस्परव्यावृत्तत्वात् स्वरूपाणां नाप्युप ॥१३
लक्षणं विशेषणं वा निरुपाधिकत्वाद्वस्तुतत्त्वानभ्युपगमादित्यर्थः। इदानीमुपाधिशंकां तदितरेतर इति यो

13

यस्य यावत्कारकवर्त्तकः स तस्योपाधिरित्यापी तरेतराभावोपाधिविशेषनिन्नपदस्य प्रवृत्तिर्नं विष्यतीत्यर्थः। एवं
तर्हि न निरुपाधिकवस्तुस्वरूपं भेद इत्याशयात् तथा च सतीतरेतराभावे सत्येव भेदव्यवहारघात्रेस्तद्भावेन
आत्मेतरव्यावृत्तिरिकास्यामितरेतराभाव एव भेदोस्तु। न च सोपि स्वभाव एव परस्परापेक्षापातीनेन स्वभावस्व
भावस्तथा भाति नतो नैकैकस्वभावः नाप्येकद्वितरेतराभावो नेकेषां स्वभावद्वितिसमीचीनवचः। तस्माद्
स्वभाव इतरेतराभावो भेद इत्याख्येयं एवं च सत्यपरापिलाभोभवतीत्यादि तथा सतीत्यादिना न नुरालोः शि
रहितवत्स्वभावे भेदपि विशेषणविशेष्यभावसंबन्धभावतास्ता त्वौपचारिको न विष्यत इत्याशंक्याह न चा
नेतितस्माद्भेदस्य स्वभाव चानुपपत्तेः प्रत्यक्षाप्रत्यक्षयुगपधर्मत्वे नो सिद्धमिति प्रत्यक्ष चानुपपत्तेरितिस्थ
केमित्याह इति सर्वं समञ्जसमिति॥ ॥पूर्वं मात्र भेदनिराकरणपरतया सत्यभेदमिति पदं व्याख्याय
दानीं सन्नानीयविज्ञानी यस्य गत प्रकारसर्व भेदनिराकरणपरतया तद्व्याचष्टे यद्वेत्यादिना न तु

यद्येतस्मिन्भूतले घटो नास्तीति निषेधेन्यत्र घटः परिशेष्यते तथा ब्रह्मणि नानास्तीति निषिद्धमन्यत्रास्तीति न स
र्वभेदनिरासः सिद्धिरित्याशंक्याह न त्वत्र ब्रह्माधिकरणस्येति स देव सोम्येदमग्र आसीदेकमेवाद्वितीयमि
ति प्रागुत्पत्तेः सर्वस्यैकमेवधर्मेतादात्म्यमुक्त्वा बहुस्यां प्रजायेयेति तस्यैव बहुपापत्तिं दर्शय
त्यतस्ततोन्यत्र नानात्वस्य सद्भावानुपपत्तेस्तत्र निषिद्धं कथमन्यत्र भवेन्नो खलु स्वभावबुद्धं न तोभद
णादिस्वपन्न इवेरितिषिद्धमन्यत्रास्तीति नावः। ननु नेह नानास्तीति लिङ्गकारणेन नानात्वं निषिध्यते न ब्र
ह्मणि नानात्वं तत्कार्यं। नेतस्मान्निहेति प्रकृतस्य ब्रह्मण एव समाकर्षात् किंच न तावत्तु त्वाकारणसामा
न्ये नानात्वप्राप्तिस्तस्यैकरूपत्वात् तद्विशेषे परमेश्वरे यत्नं न विधेयमागी तस्मात्प्राप्तं निषेधप्र ॥१४
संगाद्तु किंच नेत्याद्विशेषश्रुतिद्याकोपप्रसंगाच्च प्रतिपन्नद्वैतप्रपंचात्तदंशात्प्रविलयपरत्वमवस

14.

माश्रयणीयं। ननु दृष्यिव्यादेः कार्यत्वमसंभाव्यमानं कृत्या वा कथं प्रतिपाद्यतेऽतो ब्रह्मणः समस्तजगत्कारणता
या अशेषोपनिषत्प्रसिद्धत्वादित्यसंबद्धं न प्रमाणांतरेणापि संभाव्यमानत्वात् न त्वाहि दृष्यिव्यादिकं कार्यं
सावयवत्वाद्यदेवं तदेवं यथा घटादि। सावयवत्वमप्रयोजकमिति चेन्न विकल्पानुपपत्तेस्तथाहि किमिदं
मप्रयोजकत्वं नाम सपक्षैकदेशवृत्तित्वमाहोस्वित्परप्रयुक्तव्याप्त्युपजीवकत्वं किं वा विपक्षबाधकशून्यत्
वं तत्र न तावत् सपक्षैकदेशवृत्तित्वं समाप्यापि सपक्षैकदेशवृत्तेरप्रयोजकत्वप्रसंगात् अथाशेषसपक्ष
व्यापकहेतुसद्भावे सत्यव्यापकहेतोरप्रयोजकत्वं तदपि पारिभाषामात्रं व्यापकवद्व्यापकस्यापि साध्य
विनाभावित्वेन अप्रयोजकत्वात् न च वादिनो विवादयोः सावयवत्वं व्यभिचरतीति वाच्यं तस्याः सावयवत्वेन
निर्णेतुमशक्यत्वात् अन्यथा तस्या अपि कार्यत्वप्रसंगात् अथ परव्याप्त्युपजीवकत्वमप्रयोजकत्वमिति तदपि
न तु व्याहतं परस्पैकस्यापि साध्येन व्याप्त्युपपत्तेर्यस्य हि परव्याप्त्यधीनाव्याप्तिस्तस्यैव परव्याप्त्युपजीव
कत्वमुच्यते यथाद्रमगतेऽकटुत्वे नहि तस्य धूमं तस्य परोणवह्निनाव्याप्तिरस्ति न चैवं सावयवत्वं तस्य कार्य

त्विकत्वन्निरपेक्षस्यापि कार्यत्वेन व्याप्तेर्निरूपयितुं शक्यत्वात् तु परेणापि सावयवत्वं कार्यत्वानुमापकमभ्युपगंतव्य
मितस्थाहि [illegible] र्वापरत्वावस्या चिरतरमनुपपन्ना तस्यप्रसिद्धिविरोधादेः कार्यत्वनिश्चयो न स्यात् न हि पूर्वापरत्वाव
रणमंतरेण [illegible] त्विकत्वेपरिच्छेत्तुं पार्यते अथ विपक्षबाधकशून्यत्वमप्रयोजकत्वं तदपि न प्रकृते कार्यत्वा
भावे सावयवत्वस्यैवानुपपत्तेरात्मवदिति सावयवत्वं च यथा घटादेस्तथैव क्षित्यादेरप्यनुभवसिद्धमिति न
विशेषविकल्पावकाशः इतश्च कार्यं क्षित्यादि मध्यमपरिमाणवत्त्वाद्यदेवं तदेवं यथा घटादि सिद्धं च क्षित्या
देर्महत्त्वं तच्च तुल्यस्य कार्यत्वे तद्वन्महत्त्वात् आकाशस्यापि तत्सिद्धेरिति किं चाकाशो जायते गुणाश्रयत्वा
देवं तदेवं यथा घटादि तच्च सिद्धं शब्दस्य गुणत्वं शब्दो द्रव्यं सामानादिद्विपसंवंधे नोपलभ्यमानत्वात्पटवदि
त्यनुमानान्तरे याद्विवेकिनो नायोग्यतालक्षणसंबंधस्याभ्युपगमात् शब्दो गुणः सामान्यवत्त्वे सत्यस्पर्शवत्त्वे स
ति बाह्यैकेन्द्रियग्राह्यत्वाद्रूपादिवत् तदेवं संभावितमानांतरेणाकाशादेः कार्यत्वे शक्यते वक्तुमपि ब्रह्मणः ॥१५
समस्तजगत्कारणत्वं प्रतिपादयितुमित्यलं॥छ॥ पूर्ववादी स्वातिमायमाह प्रतिष्ठित इति। प्रतिष्ठितं प्रामाण्यं यस्य

प्राचीनस्य प्रत्यक्षाद्देहादिरोधस्य पराधीनं प्रत्यक्षादिसापेक्षं परागमवाक्यं तत्कथं प्रत्यक्षादिगोचरं भेदमपबा
धेत न कथंचिदित्यर्थः। श्लोकेन परिहरति तत्परत्वादित्यादिना आगमवाक्यस्याभेदतत्त्वप्रतिपादनपरत्वात्प्र
त्यक्षादेस्तु व्यावहारिकभेदमात्रविषयतया चरितार्थस्य तदभेदतात्पर्याभावात्तत्परातत्परविरोधे च तत्प
रं बलवदित्यर्थः। तथा यद्यपि प्रत्यक्षादिसिद्धपदपदार्थतत्संबंधसापेक्षमागमवाक्यमुत्पत्तौ तथापि प्रमितौ
नैरपेक्ष्ये सति परत्वाद्वा पूर्वबाधकत्वं यथा नायं सर्प इत्यादिवाक्यस्य प्रसक्तप्रतिषेधरूपतया प्रसंजकपूर्व
प्रत्ययमात्रसत्त्वेषूपपन्नो प्रमितौ नैरपेक्ष्ये सति परत्वाद्बाधकत्वं न द्वैतं तदुक्तं पौर्वापर्ये पूर्वदौर्बल्यं प्रकृति
वदिति। प्रबाधेश्च नात्यन्तिकत्वरस्याहिसिध्यतीति च। किंच प्रत्यक्षादेः पुरुषाश्रयतया संभावितविचित्र
दोषत्वादागमवाक्यस्य चापौरुषेयतया निरस्तसमस्तदोषाशंकतया बलीयस्त्वाद्बाधकत्वं युक्तमित्यर्थः। नन्वा
गमवाक्यानां साक्षात्तत्परत्वं सेदिति कुतो वसीयते। उपक्रमोपसंहारैकरूप्याभ्यासापूर्वताफलार्थवादोपप

त्वेऽसत्यामपि च तात्पर्यलिंगादिति ब्रूमः। तथाहि छांदोग्ये सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यद्वैत
प्रतिपादनेनोपक्रमादैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीत्यद्वैतप्रतिपादनेनोपसंहारात्तथैतदात्म्य
मिदं सर्वमिति च नवकृत्वोऽभ्यस्यते प्रमाणान्तरानधिगतमेव सत्यज्ञानानंदब्रह्मतत्त्वमत्राद्वैतं प्रतिपाद्यते त
रति शोकमात्मविदिति फलं च तस्मिन्नेवगम्यते सृष्ट्याद्यर्थवादोऽप्युपपाद्यते तत्त्वमस्यादिश्रुतिभिरेवं सर्वोपनि
षत्सु तात्पर्यलिंगानि द्रष्टव्यानि। तात्पर्यं नाम मानेन न तावितव्यमित्यप्रतीतमाह एकवाक्यतिरिक्तः शाब्दधर्मस्त
द्वैतविषयं प्रमाणबुद्धिफलत्वाविरोधे नार्थान्तरबुद्धिफलत्वमवांतरतात्पर्यं यथा गोदोहनवाक्यस्य दर्शपूर्ण
मासफलवत्तया फलत्वाविरोधेन गोदोहनकर्तव्यताफलत्वं। निरुपाधिकशेषिबुद्धिफलत्वं महातात्पर्यं यथा गो
दोहनवाक्यस्य दर्शपूर्णमासफलत्वं यथा वा सगुणोपासनवाक्यानामद्वितीयब्रह्मप्रतिपत्तिपरत्वान्नन्वेवं ता ॥१६
त्पर्यं तदर्थे तदा वाक्यं तेदस्यान्ते कार्यस्यापि वाक्यस्य पुरुषप्रयोजनं तदा तात्पर्यं तदोपपन्नं स्यात्। तथाहि

निर्धिमानेनच्छेदकताग्रह इति निर्विकल्पकस्य तागसंबंधज्ञानाविरुद्धत्वात्सकामिन्नपरित्यागोपेक्षाशब्दिफ
लं तेदावृ तात्पर्यं नेदलोके। एवं वेदपिन विरुद्धत्वं तेव स्वरूपस्याभावस्य तथात्वादिति॥ ७॥ पूर्वभागमावच्छेदेन
नेदज्ञातस्य तथात्वं शंकते विध्यदानीमनुमानतापि तत्साधनमुक्तमित्याह अत्राद्वैतहानिर्विश्वस्यता
त्त्विकस्वगतनेदशून्यत्वं मयाज्ञाद्वैतशब्देनोच्यते न ब्रेयम्। आनितात्त्विकनेदापन्नवायोगात् प्रतीतिप
राहत्यपत्तयाप्यतात्त्विकग्रहणं न इष्टं गाधपेक्षया तात्त्विको नेदो नास्तीति सिद्धसाधनं स्यात्तन्निवृत्त्य
र्थमाह स्वांतरेति ननु विश्वाद्वैतसाधनाप्रवृत्तेन सर्वस्यपक्षानिक्षेपानुपपत्तेपगमात् कथं तादृकदेशस्या
काशस्य दृष्टांतत्वं नोपादानमित्याशंक्याह अत्र च समुदायस्येति संदिग्धसाध्यतयेति विश्वाल
न स्वात्मैकस्वगत नेदरहितत्वं किं वा नेति संग्यतरेणेति प्रकारांतरेणान्यथावादिसंमततया सं
मन्मतं हि नत्वसौ घटाद्युपाधिकं नेदं विहाय स्वगततात्त्विकनेदशून्यत्वमेकव्यक्तित्वात्स्वगतादि

त्यर्थः तदुक्तं यत्र लौकिकपरीक्षकाणां मतिसाम्यं स दृष्टांत इति यथा पृथिव्यादेः सादित्वे विप्रतिपन्नं मी
मांसकं प्रति तदेकदेशस्य जन्मविनाशवत्त्वेनोत्संघातिपत्तेरितरस्यापि तदृष्टांतवदृष्टसंनष्टपृथिव्या
दिबुद्धिगोचरत्वात्सादित्वं साध्यते नैयायिकादिभिस्तदा पृथिव्यादित्य आकाशस्य तिन्नतात्त्विकमतात्त्विकं वे
त्यनेनांशेन पक्षत्वेपि स्वगतभेदत्वांशेन सपक्षत्वमिति भावः। इदानीं विपक्षबाधकं तर्कमनुमानसहकारित्वेनोपन्य
स्यति नेदस्येत्यादिना वास्तवनेदं वदन्तु प्रष्टव्याः किमयं वस्तुनः स्वभावस्तत्स्वभावः किं धर्मस्वभावस्तत्स्वभावस
मुच्चयात्माद्यालोचितविकल्पग्रहणं निरूपणानुपपत्तिरिति भावः अथ धर्मस्य प्रतियोगिनिरपेक्षत्व संगादि
हेतुभिर्निरस्तत्वात्तत्पक्षितात् इत्याह अथ भाव चेत्यादिना ननु विशेषणविशेष्यभावग्रहणनियमात्ता
नूतस्वतंत्रः तथापि परतंत्र एव वाक्यार्थवाचोधर्मोऽतिविप्रतिपत्त्याशंक्य विशेषणविशेष्यभावो वाक्यावपदेनिरूप्य
त्वेन शक्यवहत्यतिप्रसंगात् विशेषणविशेष्यभावे नश्चितिदंते दितोविशेषणविशेष्यभावग्रहणाबुद्धा ॥१७

गवन्तेदांतर ग्रहणेना नचितर्द्धं तत्रहेतुमाह इदं आद्यावित्ति इतश्च भेदग्रहणपूर्वको विशेषणविशेष्यभाव
इत्याह तस्यचेति । विशेषणविशेष्यभावस्य संबंधग्रहणपूर्वकत्वात् संबंधस्य च तिन्नाश्रयवे भेदावगमाद
यशं घ्रागेव भेदोग्राह्य इदानीं विशेषणविशेष्यभावस्य भेदग्रहणपूर्वकत्वे संबंधग्रहणपूर्वकत्वे च प्रमा
णं हेतुं तत्र माह अनाकलितेत्यादिना । गृहीतसंबंधयोरभावसमवाययोर्विशेषणत्वे तु अक्लि
या मात्रमित्यादि तमन्यत्र इतश्च भेदग्रहणपूर्वकएव विशेषणविशेष्यभाव इत्याह विशेषणविशेष्य
भावस्य चेति एवं ताव द्विशेषणविशेष्यभावस्य भेदग्रहणपूर्वकत्वं उपपाद्यानवस्थादोषं स्फुटीकर्तुं
चोद्यमुद्भावयति नन्वत्र तु न हीति विशेषणविशेष्यभावग्रहणहेतोः पूर्वपूर्वभेदग्रहणस्यासिद्धौ तदसि
द्धे मौलिकभेदासिद्धिमूलकहानिरित्यर्थः । तृतीयं पराकरोति स्वभावाभावसमुच्चयः पुनरिति । एकैकसं भा
वनावगमपूर्वको हि समुच्चयावगमो दृष्टः पूर्वोक्तनीत्या च नैकैकसंभावनेत्यर्थः । न चैकैकपक्षोक्तदोषनी
त्या समुच्चयः स्त्रीक्रियत इत्याशंक्याह परस्परेति नहि घटस्य भाव प्रध्वंसौ युगपद्भवत इत्यर्थः । अथ

भावाभावरूपयोरपयोरपि स्वभावाभावयोरेकत्वाविरोध इत्यत्राह विशेषे चेति । चतुर्थं दूषयति असमुच्च
यात्मनोपीति कथमसंभव इत्याकांक्षायामाह सत्त्व स्थितिरिति परस्परविरुद्धयोः स्वभावास्वभावयोः समुच्चयात्मा
प्रकारो नाम समुच्चितरूपरहितः प्रकारः स च स्वभावो वास्वभावो वेति द्वयीगतिर्न तृतीयः कश्चिदस्तीत्याह क
थमयं तृतीयः स्यादिति स्वभावो न भवतीति स्वभाववैलक्षण्यं नामैकरूपं तथा स्वभावो न भवतीत्यस्वभाववै
लक्षण्यं वा परं तत्तु न यावैलक्षण्यात्मा यमसमुच्चयात्मा प्रकारो स्थितिरिति शंकते स्वभावास्वभाव इति मेवमिति
चोद्यं निरस्य लोकेन हेतुमाह परस्परविरुद्धानामित्यादिना परस्परविरुद्धानां भावाभावरूपाणां यथा स्व
भावो भवत्यस्वभावो भवतीति विधौ समुच्चय विरोधस्तथा स्वभावो न भवत्यस्वभावो न भवतीति निषेधेपि
वैलक्षण्यद्वयसमुच्चयविरोधस्य भावी वीर्यद्वैरस्यानिवारणात् यतः परस्परप्रतिस्पर्धिनोरन्यतरनिषेधे
न्यतर विधिरेव यथा नित्यो न भवतीत्यक्ते अनित्य एव वा नित्यो न भवतीत्यक्तेपि नित्य एव परिशिष्यते न च ॥१८
न्यतर तयोरपि स्वभावावैलक्षण्यमस्वभावो स्वभाववैलक्षण्यं स्वभावः तस्मात् वैलक्षण्ययोरपि समु

स्यो विरुध्यतइति ताव। न हि चतुः कोटिविनिर्मुक्तो तत्वात्तस्यापि चास्ति। शंकायाः हि तेने तावेत्रगत्यपसं
प्रसमुच्चयासं भवतप्रदर्शनेन कोटिचतुष्टयाविनिर्मुक्तो तत्त्वस्यापि निरस्तः। न च निरुक्तकोटिविनि
र्मुक्तेपि लक्षणचतुष्टयस्य परस्परविरुद्धस्य समुच्चयानुपपत्तेरवस्थ यथा हि परस्परविरुद्धम
पि लक्षणचतुष्टयमेकस्मिन्नु स्वीकृतेयनेतदुक्तात्मनापि तस्य प्रसक्तौ किंलक्षणानि विम
नप्रयासोपपत्तिः स्यात् तत्र चतुष्टमानक्रियाध्या। नयत्राविशेषादि [illegible] स्यपरविन चतुः कोट्यात्मक
चेताद्विलक्षणाचेत्याएतदुक्तं तत्वाविधानावास्यनाघात [illegible] यातस्तु [illegible]
त्मकमुक्तस्यविरोधमप्येवन स्वीक्रियते यदि विरुद्धमपि किंलक्षणचतुष्टयात्मकत्वमुक्तस्याप्युपगमो
ने तर्हि चतुः कोट्यात्मकत्वमेवास्त्विति। नहि तथैवानेकेनापि प्रकारेणावा [illegible] कांक्षिसाय
पि जिनस्याशंकामुक्तं न च नहीति चेदुपपत्तिमवप्रकटयति पारिकल्पिताद्भिनांश [illegible] कोटीनांन
स्यतदात्मकत्वनियमएकैकको द्यात्मकत्वनियमो नास्तिकं स्यात्तदाकथमेकैका तेच [illegible] कोट्यात्म

स्यात्तथापि घटएककोट्यात्मकस्यनको हितराल्पकथ्यसंत्यायनेयथात्स्यैव कोटेरित्युपशं। अथ नाप्येकैक
ककोटीनांतदात्मकत्वनियमए कैकात्मकत्वनियमो वानास्तिकः स्यात्तदा भेकधर्मकं कर्त्ता चतुः कोट्यात्मसत्ता
त्मकत्वं स्थितं तु परस्परव्याहत कोटिचतुष्टयमेकस्यादित्यर्थः। अनियमपक्षे [illegible] नाहानियमपीति
नदेकस्यैकैककोट्यात्मकत्वानियमात्ताव्रकोटीनां वातद्यात्मकत्वनियमात्तावेनचतस्रःकोटयः संतिःने
स्यैकैकात्मकत्वमूर्धकत्वमाहानियमएवेति तस्यैकैककोट्यात्मकत्वनियमात्तावकोटीनांयात दात्म
कत्वनियमात्तावेनचतस्रःकोटयः संभिन्नेदस्यैकैकात्मकत्वमूर्धकं वा तु कोटिचतुष्टयात्मकस्य
त्यर्थः॥६०॥ अत्राशां [illegible] बलात्तसर्वस्यवस्तुनोनेकांतत्वात्तस्य चतुःकोट्यात्मकत्वविकल्पमहीप
तेन तत्प्रमाणावास्या। नतूपत्यत्तमेवप्रमाणंतयाहि प्रत्यक्षेणास्वदेशकालादिषु घटस्यसत्वं गृह्य
तेदेशांतरादौचासत्वमिति सदसदात्मकत्वसिद्धिः। अनुमानतोपि विमतसत्वमनेकांतात्मकं प्र
मेयत्वात्सामान्यविशेषवद्रूपं वतरसिद्धवदिति॥ अत्रोच्यते तमसा [illegible] ॥१९

[illegible]

दिक्षप्रत्यक्षलक्षणं प्रमाणं। तस्य च प्रमेयसत्तामात्रग्राहित्वात् यत्किंचिद्दृशादिरूपस्य च प्रसिद्ध्यात्मसद्
दिकमेकांतत्वं न च तदस्तीति। ननु घटादेर्मृद्रूपेण नित्यत्वं घटादिरूपेण वानित्यत्वं दृश्यम
तदात्तव तु अनुत्पत्त्यादेकात्मकत्वं नयोरनुवृत्त्यावृत्तयोरेकसंतानायुतः स्मानित्यमेव एव
ता। ना। घटादेर्मृद्रूपता हि मृदन्वितता न वा अथ्यन्वितता यारनुवृत्त्या भिन्नाभिन्ना किं वा निर्वचनीय एव कार्यकारणं
यथानुभूतिनासंहे दः। परमार्थतस्तु न तिन्नो नातिन्नो नाभिन्नाभिन्नो वा अर्थांतरत्वात्। यच्चानुमानमुपन्यस्तं तदपी
त्यस्मद्दृश्यं। तत्रास्तद्रूपस्य नित्यत्वमेव घटादेरस्य नित्यत्वमेवार्थांतरत्वात्। यच्चानुमानमपि प्रमाणसंपदमियगच्छतीति। तथाहि प्रत्य
क्ष...ा। तता ... इंद्रियव्यापारसमासादित बाधबाधाविधुरीततनुतया न प्रमाणसंपदमधिगच्छतीति। किं चान
िंद्रियव्यापारसमासादितबाधबाधा विधुरीततनुतया न ... नियतमित्यप्रत्यु बाध्यः। किं वान
णयावतानुपलं नो सामान्यानां तावतां नियतमेव स्वरूपमुपलभ्यते नानियतमिति प्रत्युत बाध्यः। किं चाने
कांतवादितानित्यसिद्धयायोडीवादे सकलसंख्यावतां वानेकांतानेकांतानभ्युपगमहानिः। अशेषवस्तु किं
चयदेतदनेकांते प्रमाणमुपन्यस्तं तत्किं प्रमाणमेवोत अप्रमाणम्। अपि प्रथमपक्ष तत्रैव व्यभिचारः स्वरमेनव

तः सर्वभावानामनेकांतत्वसिद्धिरप्रमाणत्वाद् यद्यप्रमाणत्वमस्याभ्युपगमात्तस्मिद्धिः तर्हि अप्रमाणस्याप्यभ्यु
पगमात्तदसिद्धिरिति च प्राप्ता। किं च यदि गर्भेरेव कृतं तत्र अयमेवोत अन्यमपि। प्रथमे तत्रैव व्यभिचारः प्र
६२ रमेयत्वेनोपहतमनुमानं तथाहन्यते किं विषादिवदन्योन्यत्वे तत्त्वाद्यमपि स्याद् विशेषाय दृष्टांतः सामान्यवि
शेषवदितिसोपि साध्यविकलः तथाहि सामान्यविशेषशब्दे न सत्त्वातिरिक्तं द्रव्यत्वादिसामान्यमुच्यते
तच्च सामान्यमेवाभ्युपगतं तथा च तत्प्रत्ययस्यापि हेतुत्वादुपचारतो विशेषशब्देनाप्युच्यते न सामान्यादिकस्या
नेकरूपानुपपत्तेर्यश्चोदम्बुदाहरणं नरसिंहवत् नरसिंहवदिति तदपि साध्यविकलत्वान्नोदाहरणं तथाहि
एवं तेदावभासः संवेदनानामध्यसंवेदनत्वे बाधकाद्दर्शनादिति वाच्यमित्याह अस्वसंवेदनत्वेति
त्यादिना। यथा घटसंविद्धा निरिक्तासंविदन्तरं घटसंविदृष्टान्तः तद्गोचरसंविदंतरस्य तथैव
वे तु पले तेनातावासिद्धिः लोकसिद्धदृष्टान्ता वस्तुतेन प्रयोगे ऽविप्रतिपन्नत्वान्याये न बोधनीयः
इति विशिष्टावभासः कृतो न तवेदित्यत आह न ह्यविदित इति इदं कथं नूनं विदितमिति वेदने
नावद्विशेषणं तथास्फुरति विज्ञाते च विशेषणे विशिष्टावभासः संभवति न त्वप्रकाशमाने दंडे

दंडीति विशिष्टप्रत्ययो दृष्टः ततो विशिष्टावभासानुपपत्त्या संवेदनानां स्वसंवेदनत्वमेव वक्तव्यमिति
भावः। ननु तस्य विशेषणस्य संवेदनान्तरेण स्फुरणं न विघ्नतीत्यन्यथाप्युपपत्तिरित्याशंक्याह न च
वेदनान्तरमिति यदि स्वविज्ञोचरं संवेदनान्तरं स्यात् योग्यत्वे सत्युपलभ्येत न चोपलभ्यते। न च वेदना
वोवसीय [illegible] ननूपलभ्यत एव स्वसंविज्ञोचरं वेदनान्तरमिति तत्राह अनुभवैकनिवेद्यानि तु घट वे
संविज्ञोचरं संवेदनमनुत्पन्नं [illegible] तावता तज्ञोचरमप्यनुत्पन्नमिति [illegible] यथा माहात्म्य तत्राह आ
घसमानयोगक्षेमत्वादन्तरविज्ञानानां तुल्यसामग्रीकत्वादित्यर्थः। एतदेव स्फुटयति यावतीनां
दिना मनसा संयुक्त आत्मनि समवाय एव प्रत्ययमज्ञानोपलम्भसामग्री साहित्या यादवयापि विशि
ष्टेवसर्वज्ञानानामात्मन्येव समवायात् तेषामप्युपलम्भेन न भवितव्यमित्यर्थः न तु घटादिसं ॥४०
विज्ञोचरं संवेदनं विद्यमानमपि सामग्रीसत्त्वेऽपि नानुभूयते इदं विरुद्धमित्याशंक्याह न च

नु

दृश्यत्वेन तस्य सामग्रीसद्भावविकल्पादनुपलंभं नंदनिमशक्यं यत्नामित्याह तथा च योग्यानुपलंभादि वि
किं विद्यमानोपि घटो दृष्टाविकल्पान्नोपलभ्यते किं वा न आत्मादेव ति संदेहादित्यर्थः। तस्माद्दृश्यमात्र
विकल्पा सामग्रीसद्भावेप्यनुपलंभो द्वितीयसंवेदनस्य निनश्चक्यवक्तुं। इदानीं प्रकारांतरेणानुपलं
भं साधयति तथापीनियम्यदृश्यमात्रविकल्पादनुपलंभो भवेदन्ते तथापि पूर्वसंवेदनं बाह्यार्थगोच
रं यद्द्वितीयं चांतरसंविज्ञानगोचरमित्यवांतर विलक्षणं प्रति यमानस्यापि तस्यानुपलंभो घटते यथा
नाग्र्यकालीनस्यात्मनि समवायनुभवजनुपलभ्यते सोप्यनुभवस्तु नोपलभ्यते तद्वदित्यर्थः दृष्टांतेन
दर्शितिक्रियार्थिलक्षणेन परिहरति नवेन्नामनित्र दृष्टांत तथात्वेन्नाम विद्यमानस्यापि प्रयत्नस्या
नुपलंभोत्वेन्नाम यदि तेन विनानुपपद्यमानं हस्तचेष्टादिकार्यमस्ति कार्यं दर्शनं तस्यावश्यकं
ल्पनीयत्वात् प्रकृते तु संवेदनविषयसंवेदनं तरं व्यतिरेकेणानुपपद्यमानं कार्यं किंचिन्नास्ति येन त

दृशेनुपलभ्यमानमप्यस्तीति किं चान्येनेते स्वघटो अहं पूर्ववादी घटो मया विदित इति विशिष्टसंवेदन
मेवान्यथासिद्धं कार्यं न हि मे द्वितीयमणानुभवसंवेद्यतु गुणमंतरेणावकल्प्यते। तस्माद्दन्यथानुपप
त्त्यैवानुपलभ्यमानमपि वेदनांतरं कल्प्यतामित्यर्थः। अन्यथाप्युपपत्तिमाह तस्यैव निर्विशिष्ट
संवेदनं विशेषणस्फुरणमात्रमपेक्षते न तु विशेषणान्वितेन तत्सुरणेन तथा वितथमित्यत्रया
पारो सिध्यत एव च विशेषणस्य संवेदनस्य स्फुरणं न विप्रतीतिज्ञायते। इदानीं व्याप्तिबलेन
भेदं साधयति यद्यपि प्रदिहरतिनानानीति सर्वस्य घटादेस्तिरिक्तं वेदनं वेद्यत्वं व्याप्तिवे
दनबलेन सिद्धमिति व्याप्तिसंवेदनस्य तु वेदनांतरवेद्यत्वेन व्याप्तं तदवेदनेन सिद्धमानीतिव्य
तिचार। इति चारांतरमाह किं च व्याप्तिग्राहिणा सर्वसंवेदनमस्य संवेदनमिति नैयायिकानां व्या
प्तिसंवेदने सर्वस्य संवेदनस्याख्यसंवेदनत्वं साधयत्त्वस्याप्यस्य संवेदनत्वं साधयति संवे

॥४१

42

दनस्य प्रयोजकस्य स्वस्मिन्परत्र च साधारणत्वान्न तु तस्य ज्ञानातिरिक्तेनाख्यसंवेदनत्वं सिद्धमिति तथा
सर्वं कार्यं सकारणकमिति ज्ञानं सर्वस्य कार्यस्य सकारणकत्वं साधयतु न स्वस्यापि कार्यत्वाविशेषात्तु
सकारणकत्वं स्वयमेव साधयति तथा सर्वं वस्तु सात्मकमिति व्याप्तिसंवेदनं सर्वस्य सात्मकत्वं सा
धयतु स्वस्यापि सात्मकत्वं साधयति न तु तस्य सात्मकत्वं व्याप्तिवेदनान्तरेण सिद्ध्यतीति कथं च
दस्तु तत्स्वातिरिक्तवेद्यं नास्तीति चेदीयथाश्रेन व्यतिरेकपरं परापि तु तत्त्वे तत्पर्यं । तेषां नसा
हाद्यगोचरत्वमित्याह परं गोचरत्वं तत्त्वे विनिश्चितांत्याह घटसंवेदनमपीति न तु नः पूर्वं बाधा हस्व
परसाधारणाद्व्याप्तिर्न तु परत्र च साधारण्यं प्रवृत्तिनिमित्तसंवेदनत्वादिति दर्शनस्वगोचरत्वं व्या
प्तिसंवेदनेषु दृष्टं न तथा घटज्ञानं वेदनमात्रे साधारणनिमित्तमस्ति येन स्वगोचरत्वमपि स्यादि
त्यर्थः परिहरति नास्यापि धर्म्यमात्रत्वादि व्यतिबद्धिनेत्यं शब्दष्टान्तदार्ष्टान्तिकत्वाभावान्न विघटते च

वेदनत्वस्य प्रयोजकस्य स्वस्वव्याप्तिरिक्त निरपेक्ष सिद्धिर्वैयधिकरण्यात्स्त्वयानुवेलसंप्रमात्रं शं
कितं न तावता दृष्टान्तदार्ष्टान्तिकत्वाभावस्तिति त्यर्थः । उक्तं हि किं विज्ञाधर्म्यादुपसंहारसिद्धवैधर्म्या
द प्रतिषेध इति अथ दृष्टान्तदार्ष्टान्तिकयोः सर्वथा साम्यं वक्तव्यमित्यत्राभिप्रायः । तत्राह सर्वथा चेति
न हि घटवदनित्यः शब्द इत्युक्ते घटस्य वृत्तावयवत्वोपि न तथा चेति तस्य श्रुतत्वं सर्वथा च साम्ये दृष्टा
न्तदार्ष्टान्तिकत्वाभावोपि नस्यादित्यर्थः । ननु स्वपरसाधारणमेकं प्रयोजकमंतरेणापि यदि स्वप
रयोः प्रवृत्तिः कस्यचिद्दृष्टान्तस्यान्तदाये धर्म्यमात्रं तदिति वक्तुं शक्यते न च तदस्तीत्याशंक्याह प्रदी
पवदिति एतदेव स्फुटयति यथा खल्विति उक्तोर्थः संवादकमाह न प्रयोजकमिति एकं ज्ञानमेवांतरं धो
मि: कस्यचित्प्रदीपादेः प्रकाशकं अन्यस्य घटादेरुपमेयत्वान्मांतरं च यथा हि प्रकाशकं नैक ॥४२
रूपमेव सर्वस्य प्रकाशकं किंतु वस्तुस्वभावविभिन्नाभ्यासपरतया नपेक्षयैव विज्ञानोपि दृष्टव्य एवं च स

त्येत्यंतनिरपेक्षस्य संवेदनस्य नैकमप्यप्रकाशकं सज्ञानीयं विजातीयं वाकाक्षानिरत्यर्थः। यस्माद्यदस्ता
तस्यानिरिक्त वशेनैव सिद्ध्यतीति नियमाजावान्न संविदः स्फुरणं त्विन्न तस्मादिल्युपसंहारः। चित्रेर्ये
नस्यासंवित्रावस्फुरणेसति नखल्वघटोमयाविदित इत्यादिकानकुपायिस्तत्वछिन्नाय वहतिःसं
नवनिश्चवच्छेदकस्फुरणमंतरेणावच्छिन्नव्यवहारानुपपत्तेः अन्यातर्हिसंविद्विषयाप्रतीतिरित्व
निनवाच्यमित्याह प्रतीतावन्यस्यासंविद्राहिकायांसत्यां प्रसक्तं प्रसज्यानवस्था प्रसरती तिपरिशे
षात्स्थतएवसंवित्स्फुरतीत्यर्थः। उक्तन्यायेन चोद्यांतरं दूर्लितमित्याह एवं चेदमिनिष्टतेनेत्यनः
सा कानःस्पष्टार्थः। एवंतावदन्वयव्यतिरेक्यनुमानं तदनुग्राहकन्यायेन च संविस्त्वप्रकाशत्वेप्रा
प्येदानीं तेनैवन्यायेनानुमानांतरमपि समर्थितं नयनीत्याह एतेनेति प्रागुक्तन्यायेनाबीनःकेव
लव्यतिरेकीत्यप्रकाशत्वसिद्धौ वेद्यत्वादिति पूर्वाचार्याणां हेतुः समर्थित इत्यर्थः। इदमित्याकूतं मीमां

कांसकामत्यंते केवलव्यतिरेकी हेतुर्गमकोनत्वयतिव्याप्तिप्रसंगाद्यथा हिघटोपि स्वप्रकाशोघ
टत्वादः स्वप्रकाशोनत्वयतितासो घटो यथापटः। स्तः शशविषाणविपर्ययात्तूधान्वयदेवं नतदेवं
यथागगनमित्यादीनामपि सद्धेत्वनुमानत्वप्रसंगान्न केवलव्यतिरेकिणो गमकत्वमिति संवेदनं स्वप्र
काशं संवेद्यत्वात् यदेवं नतदेवं यथाघटादीत्यस्याप्यगमकत्वमेवेति॥ अत्रोच्यते नायमतिप्रसंगः
केवलव्यतिरेक्यपकाशाकेवलव्यतिरेकिघटत्वादीनां विपक्षबाधकानुकूलतर्कविधुरत्वेन व्यतिरे
काप्रसिद्धतया प्रयोजकत्वादगमकत्वोपपत्तेरिहतु न संविदवगमस्य नतिवेदितिद्ध संवेदन
त्वमंतरेणेति विपक्षबाधकानुकूलतर्कसद्भावाद्गमकत्वोपपत्तिरिति किंचावश्यमाश्रयणीयोयं
पंथाः कथमन्यथा दृष्टिवादैक्ययोर्विमतौ बोध्यः प्रबोध्येत तथाहि ननावन्नत्वप्रक्रियावकुणवद्भू॥४३
प्यमितिविद्यनेन्वयकलापिनवाधिप्रमाणांतरमतोसौ केवलव्यतिरेकिणा प्रबोधनीयः इयिय्यां

च

दीनि च क्षणिकत्वावबोधकाणाव बाधानयदेवं न न देवं यथा शशशृंगमिति यदि सोपि केवलव्यतिरेकिणं ना
त्र सम्भवेत् कथं सत्त्वेन क्षणिकताविषयस्य बोधयेत् न खलु यत्सत्तत् क्षणिकमिति संमतोस्माकमन्वयलेशः
जलधरादेरपि पूर्वापरक्षणिकतानवस्थानभगमात् परस्य हि पूर्वापरकालकलाविकलता क्षणिकता न
तादृशी जलधरादेरुपपद्यते किं त्वाशुतरविनाशिता तस्ते नापि केवलव्यतिरेकिणा यतु क्षणिकं न तत्सत्
न तत्सद्यथा शशशृंगं संतस्मासीनावाहत्यनेन क्षणिकताप्रबोधनीया तस्मात्सर्वैरेव केवलव्यतिरेकी स्वी
कर्तव्य इति स्थितं युक्तमेव केवलव्यतिरेकिणा स्वप्रकाशत्वसाधनं ननु पूर्वमन्यार्थत्वेन बाधकमुपन्य
स्तं नाप्रयोजकत्वपरिहारायेत्याशंक्याह तदर्थमेवचेति यद्यप्यन्वयव्यतिरेक्यनुमानानुग्राहकत्वेन
पूर्वं तर्क उपन्यस्तः यापि केवलव्यतिरेक्यनुमानेऽप्रयोजकत्वपरिहारार्थमपि द्रष्टव्यमिति विशेषः स्वसंवे
दनत्वपरिग्रहेणाप तद्बाधकं प्रदर्शितमस्माभिरस्वसंवेदने चेत्यादिनेत्यर्थः। फलितमाह तस्मादिति वि
केयं पदमवतारयति तादृशस्येति विज्ञानं स्वप्रकाशं तद्रूपयोर्दप्यालोकस्वप्रकाशत्वेनैकान्तिकताइत्य
नो

तादृशस्य सर्वस्यैवार्थः विज्ञानमात्मस्वभावो न तत्र विविनाशिचातुर्यवदित्याह कथं पुनरिति निर्हेतुकस्थिरामप
रिस्फुरति न चिरान्तस्येति श्रयमाशयो विज्ञानस्य विनाशः किं स्वतः सिद्ध उत किं बाह्यानां तरेण न तावत्तेनैव त
स्य काले तस्याभावात् नाप्यन्येन संविद्क्षणमन्तरेण तद्विशेषितविनाशग्रहणानुपपत्तेः। संविदन्त
र संविदन्तरेण ग्रहणं सत्नवतीति प्रतीतिसिद्धो विनाशो न केनापलप्यतीय इत्याह नीलादिसंवेदनेत्य
त्यादिना नीलादिसंवेदनसमकालं पीतादिसंवेदनं न दृश्यत इति कोर्थः किं पीतादिकपरागो न दृश्यते उत
तत्संविदपि न तावत्संविन्नदृश्यते नीलोपरागकालेऽपि तत्स्फुरणात् पीतादिकपरागादर्शनं त्वङ्गीक्रियत एवेत्या
ह न पीतादेरित्यादिना यावत् पीतसंविन्नस्तीति प्रतीतिः साक्षिघटाकाशेन व्यभिचारवदौपाधिकत्वेनापि न
विच्छिन्नतीत्याह विनाशप्रतीतेरपीति ननु प्रमाणान्तरेणाकाशस्यैकस्य स्थिरत्वादिनाशप्रतीतिर्मिथ्या
विनाशविजयतीति कल्पयितुं शक्यते न तथा संविद्धेकोक्यमाननस्तीत्याशंक्याह अतो नतदृशतीति गौरि ॥४५

45

नियतसंविसंविदिति प्रत्यभिज्ञानतः शुंसः संवेदनेनैवानुपलंभात् प्रत्यभिज्ञाप्रमाणेन व्यक्त्यैक्यसि
द्धिरित्यर्थः। संविदस्य प्रत्यभिज्ञायमानत्वे नामरूपप्रकाशत्वात् स्वरूपाध्यवपरागेष्वेकाकारपरिस्फुरणान
यनिष्कर्षे ६। ननु प्रत्यभिज्ञागोचरे प्रत्यभिज्ञावदेव सामान्यविषयत्वात् विव्यक्तिनिरूपाधिकसंविदाक्तिनि
द प्रमाणतायात्रे दशावेपि सामान्यविषयत्वकल्पनायां घटाकाशादिष्वपि प्रसंगात् संविदद्वित्वाभिन्न
सामग्रीसाध्यत्वाद् घटादिवदित्यनुमानेन प्रामित्रासिके भेदसाधने सिद्धसाधनतावास्तवभेदसाधने
कृपाकाशादावनैकांतः श्रोत्रादिव्यापारस्य चानित्यत्वम् अर्थश्चेनापि सत्वादित्यलं। अनुमानमपि वास्तव
यत्नेकदर्शयति प्रयोगश्चानित्यांतर्गणिकइतिव्यगतयास्तवभेदस्यत्यर्थः। फलितमर्थमाहस्तोके
न एवं चेत्यादिना एवमुक्तप्रकारेणाप्रत्यभिज्ञया अनुमानेन वा भेदस्य संविदसौस्य संसिद्धोसत्वामात्मन
संविदस्यात्मनः स्वप्रकाशत्वमविचार्यमितिसिद्धं। स्वप्रकाशत्वेवासिद्धे किं फलितमित्याशंक्याह

तथा चेति तथापीत्यादिस्पष्टार्थः। नन्वेतादृशमपि दृश्यत्वमात्मनो विद्यत एवाद्वितीयादिव्यवहारस्यानिरोधि
दर्शनापेक्षानियमादित्याशंक्याह न चौपाधिकात्मविकल्प इति। अद्वितीयत्वेनामद्वैतात्रावोपाधिकं
रूपं स्वप्रकाशात्मप्रकाशात्रेदात्रावोपाधिकरूपं तत्र नित्यासत्तत्समर्पकप्रमाणापेक्षायामपि स्वरूपमा
त्रव्यवहारो न प्रमाणापेक्षास्ति स्वप्रकाशत्वादेतद्व्यतिरेकेणापि स्वरूपस्फुरणादतो न दृश्यत्वहेतोर्व्यभि
चार इत्यर्थः। ननु द्वैतादत्राविशिष्टमात्मायद्यागमेन वेद्यते तर्हि स्वरूपमवश्यं वेद्यमेव
वेद्यरूपं वृत्तिरित्यर्थः। ननु द्वैतादत्राविशिष्टमात्मा यद्यागमेन वेद्यते तर्हि स्वरूपमवश्यं वेद्यमेव
व क्वचिन्न हि स्वरूपे दृश्येतस्याविशिष्टमवगंतुं शक्यमित्याशंक्याह विशिष्टस्फुरणेपि चेति अप
मर्थः आगमादनुमानाद्वा द्वितीयत्वाद्याकाराबुद्धिवृत्तिरुत्पद्यते तस्यामनित्यत्वोदयात्स्वास्वात्म
दे तावादिविशिष्टत्वमपि साधयतीति स्वरूपे दृश्यापि विशिष्टं मिदृश्यमिति। नन्वात्मनो दृश्यत्वे मे ।।४५
वात्रविस्तरेणोपपादनीयेन तद्व्यतिरेकेणा वैकांत परिहारासंभवादित्याशंक्याह अन्यथापि चेति साध्य

46

स्यानैकांतिकतापरिहारस्याचान्यथापिस्वप्रकाशविज्ञानाभेदेनस्वप्रकाशत्वसाधनेनापिसमर्थितत्वादि
त्यर्थः।इदानीमप्रयोजकत्वमाशंक्यपरिहरतिश्लोकेनजडतादृश्यताचेत्यादिनासत्यस्यैवप्रपंचस्यजडडु
ताद्दश्यतायास्ताबाधकंतथाचविपक्षबाधकतर्काभावादप्रयोजकत्वमितिचेन्मतंनैवंवाच्यंसत्यत्वेप्र
पंचस्यसंवित्संबंधासंभवेनतद्धर्मिणःप्रपंचस्यैवासिद्धिप्रसंगादित्यर्थः।नन्वत्रधर्मिणःसिद्धिःसं
थापिजडत्वदृश्यत्वेसत्यत्वेननविरुध्येतेइत्याशंक्याहद्वितीयश्लोकेनयस्येत्यादिनाननुनहिसंविन्न
बंधव्यतिरेकेणापिजडस्यप्रमाणादेवसिद्धिर्भविष्यतीत्याशंक्याहनचतेऽदसंबद्धमितिजडस्यसिद्धि
नीमसंविन्नसंबंधएवस्वाभाविकस्फुरणासंभवादतःसंविदाऽसंबद्धंजडंनसिद्धंनामस्यादित्यर्थः।असि
द्धिमेवोपपादयतिनेत्यादिनासंबंधानिरूपणमेवप्रकटयतिनहिसंविन्नंबंधोऽस्तीत्यादिनान
तावत्संयोगःसंभवतिसंविदोद्रव्यत्वानुपपत्तेःनापितादात्म्यंद्रव्यकाठिन्यवहिरुद्धयोस्तदनुपपत्तेर्नापिसमवायः

आत्मैकगुणत्वान्निमनस्यघटादौसमवायायोगादित्यर्थः।विषयविषयिभावएवसंबंधोऽस्त्वित्याशंक्याह
विषयविषयिभावोपीतिकानुपपत्तिरित्याशंक्याहनहिसतीतिसंबंधोहिनित्यसंबंधिपरतंत्रएवनचास्मिन्सं
बंधत्वंतावेकधर्मसोऽस्तीत्यर्थः।ननुवर्तमानेनावच्छिन्नविषयविषयिभावोऽपिनिष्पन्नवर्तीनादित्याशंक्याह
नचसंविदसंस्पृष्टंचेतिसंविन्नसंबंधव्यतिरेकेणापिसिद्धौसर्वस्यसर्वार्थसिद्धिप्रसंगादित्यर्थः।तर्हिजन्य
जनकभावएवसंबंधोऽस्तुकर्मकारकतयाविषयस्यजनकत्वादित्याशंक्याहहेतुमज्ञानस्येतिचवि
षमानस्यजनकत्वानुपपत्तेरित्यर्थः।किंचचक्षुरादीन्द्रियरूपादिज्ञानानांजन्यजनकभावोऽपिनबा
स्तिसंविन्नबंधस्तावदित्याहसत्यमितिचाक्षुषोऽपिघटप्राकट्यंसांख्याःमुख्यानुमितप्रतिकृत्यान्वयेनावि
षयमुख्यानुमितज्ञानद्वारेणविषयस्यांतःकरणप्रविष्टस्यचिदात्मनोपलब्धिःसंभवत्येकांतःकरणासं ॥४६
कांतिलक्षणसंबंधादितितदप्यतीतावेसंबंधासंभवप्रदर्शनेनपरास्तमित्याहएतेनेतिन्नचैतावता

47

कारेण तस्यापि सत्त्वं विघटेतेत्याशंक्याह सत्त्वेऽपि चेति । अयं भावः अतीतत्वं नामातीतकालावच्छिन्नत्वमुच्यते तेन वाव
च्छेदकत्वं तरणावच्छिन्नस्य सद्भावो नागीविशेषणस्यातीतकालस्येदानीं सद्भावे वर्तमानत्वापत्तिनातीत
त्वादिकं स्यादिति अतीतादिष्वपि वर्तनेऽनागतादिष्वपि वर्तनेत्यादि प्रयोगोऽप्यविचारितसंसिद्ध एवास्माक
मुपपद्यते न त्वसत्त्वेऽतिमानिनो निरूपणासहत्वादिति द्रष्टव्यं किं वर्तमानेऽपि यद्यपि विजयस्यान्तःकरणानु
प्रवेशः संभवति न चापि चैतन्यस्यान्तःकरणानुप्रवेशः संभवति कूटस्थत्वादित्याह संविद इति चै
तन्यस्यान्तःकरणप्रवेशः संक्रमणं न संभवतीत्याह पूर्ववादी चैतत्करणस्येव तिमिरादीनि इष्टानि अथ विवर्ति
के यं तद्घटितानाम किं परमार्थोऽन्तःकरणस्य संविद्रूपता किं वा इति यथा प्रतिभासिताश्च यं तन्न य
तित तावदात्मनो विद्रूपस्यान्तःकरणस्य तादात्म्यं चिद्रूपत्वं पारमार्थिकं संभवति विरोधादिति द्वितीयं दूष
यति स्वतात्त्विके तु तादात्म्येऽन्तःकरणस्य चिद्रूपत्वेऽपि तात्त्विकं बंधनैकान्तः करणसंक्रान्तिलक्षणसंबंध यत्तात्त्वि
के सति न परमार्थतो दृश्यं दृक्संस्पर्शात् दृश्यता हि नाम दर्शनसंबद्धता न च पारमार्थिकः संबंधोऽस्तीत्यर्थः । तस्मात्स

त्यत्वे प्रपंचस्य संविदसंसर्गानिरूपणादसिद्धिरेवेति सिद्धं । प्रपंचस्यासत्यत्वे वा कथं संबंधसिद्धिरित्याशंक्याह
असत्यत्वे चेति तिरस्कार्यानुगुणत्वे न पुनरपि पूर्वमवतारयति एतदप्युदितमित्यादिना अथैवमपि तिरस्कार्य
कृतेत्याकांक्षायामाह ज्ञानमात्रस्येति प्रतिबिंबेनेत्याह तस्य ज्ञानमात्रस्य प्रतिबिंबकगमकत्वं चेत्तत्राति प्र
संग एव स्याद् घटादिज्ञानानामपि बिंबगमकत्वप्रसंगात्प्रतिबिंबेनेत्याह तत्र यावेशि[illegible]दित्यर्थः अथैतद्
भवतीत्याप्रतिबिंबेन विशेषितस्य ज्ञानस्य गमकत्वं तत्राह विषयावच्छिन्नस्यापि विज्ञानस्य भवतु ज्ञान
प्रतिबिंबस्येव बिंबगमकत्वान्नासत्यस्येव गमकत्वं नियम इत्यर्थः स्वरूपेण मिथ्या चेऽपि सत्यवस्तुगम
कत्या प्रामाण्यं श्रुतेः संभवतीत्यनेन शंकान्तरमप्युत्सारितमित्याह एतेनेति ॥ ६ ॥ एवं तावद्द्वैतप्रपंचस्य
मिथ्यात्वोपपादनेन प्रत्यक्षादिविरोधपरिहारेण श्रुतेरद्वितीयवस्तुनि प्रामाण्यमुपपाद्येदानीं कार्य ॥ ४८
परस्याशंकापाकरणेन तदेवोपपादयति प्राप्ताकरमतमाह यत्त्वेवमपीत्यादिना यत्तु मन्यन्ते
स्वयः किं मन्यत इत्याकांक्षायामेवमपि यद्यपि विद्याप्रामाण्यमुपपादितं तथाप्यसति कार्यान्वय

नसंगतत्वमिति मुख्यार्थत्वस्या व्युत्पत्तिग्राह्यत्वं वेदांतानामित्यन्वयः । ननु इत्याकांक्षायामाह शब्दानामिति अ
यमर्थः उत्तमवृद्धेन देवदत्त गामानयेति प्रयुक्ते शब्दे श्रवणानंतरं मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य पार्श्व
स्थो बालोऽनुमिमीते अस्येयं प्रवृत्तिः प्रवर्तकज्ञानपूर्विका स्वतंत्रप्रवृत्तित्वात् मदीयप्रवृत्तिवत् तच्च प्रवर्त
कं कार्यज्ञानमेव तस्मान्न तोऽजनादिस्वव्यवहारे बाले नावगतमिति आत्मदृष्टांतेन मध्यमवृद्धस्यापि तदेव
कल्पयति शब्दान्वयव्यतिरेकानुविधायितया च तज्ज्ञानं सर्वे शब्दा ननु पदत्वेन वक्तृकार्यान्वितत्वार्थे
नियतं सामर्थ्यं च तदविष्यतिको दोषः तथा च विपक्षबाधकाभावादप्रयोजकत्वाशंकायामाह विपर्यये त्वित्या
दिना विपर्यये त्विति कार्यपदार्थानतिरिक्तानां सर्वपदानां कार्यसंसृष्टस्वार्थे सामर्थ्यानियमानुपगमे सति
अप्रयोजकत्वविप्लवांगीकारगौरवप्रसंगो बाधक इत्यन्वयः । न चैकस्मिन्नप्रयोजकत्वे संभवति
तद्द्वैविध्यांगीकरणे गौरवदूषणं तत्र वृत्तिश्चैकं प्रयोजकं संभवतीत्याशंकायामाह योग्येतरान्वितेति इदानीं
कार्यस्य समस्तपदसामर्थ्यव्यावर्तकत्वं व्यावर्तयितुं प्रयोगांतरमाह यद्वेत्यादिना कार्यसिद्धार्थयोरन्य

तरत्वाकारेणान्वयः स्वीक्रियते तयोरन्यतरत्कार्यं धर्मि समस्तपदसामर्थ्यस्य प्रतियोगिविजयव्यावर्त
कं न भवति द्रव्यादन्यत्वात् यदन्यद् यदन्यत् तत्समस्तपदसामर्थ्यप्रतियोगि यथा तदितरः सिद्धपदार्थ इत्यर्थः
पदत्रयवत्कार्यं तदुक्तमन्यत्रेत्यादि विपक्षबाधकमाह अपीत्यादिना अत्र गामानयेत्यत्र तु
त्वमित्यादि सत्यसति च कार्ये योग्यतामात्रेण क्रियया कारकाणां विशेषणस्य च विशेष्येणान्वयसत्वे
सति कार्येणैव सर्वपदार्थानामन्वया कार्यान्वितस्वार्थाभिधानस्वसामर्थ्यमिति नियमकल्पने गौरव
दूषणमित्यर्थः । इदानीं योग्येतरान्वितस्वार्थशक्तिसाधनाय प्रयुक्तं यद्वेत्यादिना कार्यातिरिक्तास्स
र्वेऽपि सिद्धपदार्था योग्येतरान्वितस्वार्थविवादाध्यासिततद्व्यवतत्त्रयाभिमतप्रमेयवदिति सिद्धसाधि
शाश्चात्तिव्यापकार्यवदित्यर्थः । प्रमेयत्वं तत्तु योग्येतरान्वितस्वार्थस्य कल्पनिविजयत्वेन स्वविव्याप्ति
किं तु कार्यान्वितस्यैव शब्दशक्तिविषयत्वमित्याशंकायामाह विपर्यये त्विति इत्येतार्थमात्रज्ञानात्स्वार्थः ॥४८
प्रत्येतरनुपपत्त्यैव योग्यसंसृष्टपदार्थज्ञानमनुमितं तत्र वाच्यस्य च शब्दान्वयव्यतिरेकानुविधायितया

सामान्येनान्वयं तत्र सामर्थ्यमंगीकृत्य पश्चाद्वाक्येन योग्येन संसृष्टस्वार्थाभिधाने पदानां शक्तिरिति वी-
च्यां कार्यस्य सर्वत्राव्यभिचारमात्रेणाचयात्तु कार्यान्विते शक्तिः परिकल्प्यते न हि लोके सर्वत्र धर्मवर्मस्ये
व्युत्पत्तिर्वाक्यादन्वितस्वार्थे सर्वपदानां सामर्थ्यं न यत्तु तद्वाचको दोषः स्यात्तस्मात् तथा च वेद इति ननु
योग्यतार्थधीरूपकार्यान्वयस्य प्रयोजकत्वोपादानेन बकृविशेषणं च मा पाद्यते कार्यान्वयमात्रस्य प्रयो-
जकत्वोपादानेनैतु लाघवं न हि ततोपि लघीयोन्वितत्वमात्रस्यैव प्रयोजकत्वमुपादीयतां योग्यत्वे तत्स्वरूपा
स्वरूपलक्षणत्वान्न प्रयोजकविशेषणत्वमिति द्रष्टव्यं तस्माल्लोके न समस्तपदानां कार्यान्वितस्वार्थेनु-
सामर्थ्यग्रहणं किंचान्वितस्वार्थमात्रे हानिक्षितं तान्तवचिदं लोके वेदे नुसिद्धं ये नास्त्येव नुरव्यवहारस्य प्रामा-
ण्यमित्याशंक्याह एवं स्थितेसिद्धेत्यादिना विपरमबाधकमात्रविषये येचो लिङ्गुरव्यासंगवेन लक्षणा-
श्रयणं न्युष्यते संगर्वेलिंचेतिहयोग्यान्वितस्वार्थसामर्थ्याभिधानान्तु रव्यवहारस्य प्रामाण्यं न स्मिन्नतिक्र-
मणं च बाधकमित्यर्थः । ननु सर्वस्य वेदस्य लौकिके नियोगचोदनास्त्वेव प्रामाण्यं स्थापितं न त्वेकं च स्वि

द्धसंनयतिविरोधादित्याशंक्याह एतच्च परासिमतमिति नन्वपरतिनिष्पन्नोर्थः सिद्ध उच्यते प्रमांतरगोचरो
वा तत्र प्रामाण्यप्रसाधने विहितक्रमेघोदयदर्शिनाङ्गविष्यतिवृष्टिरिति यदनुमानं तत्रानैकांतिकं स्यादि-
त्याशंक्याह परासिमतकार्य इति कालत्रयानवच्छिन्नप्रवर्तकं परासिमतकार्यं तद्विपरीते न विष्यदनु-
मानस्य प्रामाण्यादित्यर्थः । ननु तथापि त्यागे बाधितविषयत्वं विधिवाक्ये त्यागस्य परासिमते कार्ये प्रमा-
णत्वादिसाशंक्याह न पीति ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यनेन स्वर्गकामस्य ज्योतिष्टोमो निलखित-
साधनमिति प्रतिपाद्यते न नियोगाधिलखितसाधनत्वान्नादेव प्रवृत्तिरपि संभवतीत्यर्थः । विधित्वा-
गस्य नियोगानियोगानित्यत्वात्यगमे च प्रामाण्यमेवोपपद्यत इत्याह विपर्यये त्वित्यादिना अयमर्थः प्र-
तीतेताव कार्यसंगनियतलोकवक्तव्यः कार्यप्रतीतिश्च न प्रत्यक्षेण तस्य वर्तमानग्राहकत्वान्नाप्यनुमाने-
न तस्माल्लिंगान्नावान्नाप्यर्थापत्त्या तद्व्यतिरेकेणानुपपन्नत्वाभावात् प्रवृत्तेश्च तनियमपष्टसाधन ॥४९
त्वाबादेव संभवात् उपमानस्य च सादृश्यमात्रोपपद्यान्नस्मात्परासिमतकार्यप्रतीतिकारणत्वावाद

व्रतीते च संगतिग्रहयोगादष्टार्थसंगतिकानां च शब्दानां बोधकत्वासंभवादप्रमाणमेव अस्मद्येतदिति नु
यद्यपि बाह्यप्रत्यक्षत्वाशास एवं तस्य नोपपद्यते तथापि मानसावसेये तस्मिन् संगतिग्रहो न विरुध्यतीत्याशंक्याह
न च ममेदं कर्तव्यमिति ममेदं कर्तृत्वमिति निर्दिश्य यदि प्रमाणज्ञानं स्यात्तदा प्रमाणं प्रसाधादेव तन्मे यद्विशेषभि
द्धि नेदं प्रमाणज्ञानं किं तु चिकीर्षालक्षणा त्विलाघवमेवेत्यर्थः। ननु चिकीर्षापि न संभाव्यते व्यतिरिक्तका
र्यज्ञानं विना तस्यादन्यथानुपपत्तिरेव प्रमाणमित्याशंक्याह चिकीर्षायाश्चेति चश्चेति लौकिककार्यज्ञान
कारणत्वेन क्लृप्तस्योपगतं यत्कृतियोग्यत्वं प्रसाधनज्ञानं तत एव चिकीर्षाया अप्युत्पत्त्युपपत्तेर्नोसंभवं त्वा
न चिकीर्षात्वस्यार्थमापकार्यज्ञानमस्योपगन्तव्यमित्यर्थः। उक्तं हि तार्किकैरपि। कोऽशरूपं कर्म च कार्यतां अङ्गत्व
फलसाधनता तत्र कारणं तेन कार्यं तन्निकिंचित्किलक्षणं तत्तु कार्यं यत्कर्तृव्यद्गोचरः। किं चानियोग
तामात्रलक्षणं किं वा कृत्युद्देश्यता लक्षणं प्रथमं तत्त्वाद्व्यक्तानुयोग्यतामात्रस्य चिकीर्षादिमानतुल्यत्वादि
योग्यतातिरिक्ता कृत्युद्देश्यतैव कार्यलक्षणं न चेदं मानहीनं कृतिर्हि प्रयत्नः फलं तत्साधनं चाद्द

श्यज्ञायत इति मनसा ऽवसीयत एवेत्याशंक्याह कृत्युद्देश्यताश्चेत्यादिना फलत्व साधनत्वयोः कृत्युद्देश्यता
तामचिकीर्षागोचरतैव चकास्तीत्यर्थः। चिकीर्षातिरिक्तान्तः कृत्युद्देश्यता ज्ञातीत्यत्र च प्रमाणं तात्पर्य
त्यक्त विपर्यये प्रमाणस्येति न व्यतिरिक्तामयानुरूपत इति मद्वाक्यमेव प्रमाणमित्याशंक्याह वाक्या
त्वस्य चेति प्रकृतमुपसंहरति तस्मादिति यत्वित्यादिस्पष्टार्थः। विलिखं कुरु पांशुषु यद्यपि इत्यादिवदित्यस्या
यमर्थः। ज्ञानिनामृतदघस्थ क्रियते यदर्थं चौर्यादाशानु पांशुयाज मंत्र्यामतज्ञानिविलिखं कुरु पांशुषु यदृच्छया
ज्ञानिच्छाय प्रज्ञापतिरुपांशुयदृच्छयोज्ञानिच्छायोत्पन्नज्ञानिच्छाज्ञानिच्छोपक्रमोपसंहारैकरूप्यादग
तोपांशुयाजप्रतिपादपरे वाक्ये सति यथा मध्ये श्रूयमाणे विलिखं कुरु पांशुषु यदृच्छयेत्यादयो न विधयः
ह्यायात्तेदप्रसंगात तथात्राप्यामनस्कामायसर्वप्रियं तत्तवती त्यान प्रतिपादने नोपक्रमादेतावि
दरे स्वस्य सूत्रत्वनिक्षेपसंहाराद्वेकस्मिन्न्नाल प्रतिपादनपरे वाक्ये सति वाक्यतेदपरिहाराय तद्र ॥५०
ह्यवहृत्यास्यो विषयपदृच्छयाः किं चेदं हि त्वन्दरूपश्रेतिस्मरणादर्शयर्थे नार्थवादतया व्याख्यात

याहेति॥छ॥उक्तार्थजातफलं श्लोकेन संगृह्णाति यस्मादित्या उक्तन्यायेन नञ्त्वसादिविशेषोऽद्वैतामनस्य
नापि कार्यशेषतात्तस्मादित्यर्थः। अद्वैतं च तद्विज्ञानं च तस्तु स्वरूपं च तत्तस्मिन्नु अलक्षिवेदांताः प्रमाणं प्र
मिपर्यंत इत्यखंडवाक्यार्थ उक्तः इति मन्वादेति नत्वाहिप्रति अथैवमित्यादिना न च साध्यविकलत्वं तत्रा
कांतः स्पष्टार्थः। ननु दृष्टुबुभुक्षादेराकाराघट इत्यनेनापि दृष्टुबुभुक्षादिधर्मविशिष्ट एव बोध्यते
ऽखंडार्थत्वाभावात्साध्यविकलो दृष्टांत इत्याशंक्याह न च साध्यविकलत्वं इति घटप्रातिपदिकार्थदृष्टे
यघन्यएव विशिष्टार्थः प्रतिपाद्यते तदा प्रश्नानुरूपत्वादनुपादेयवचनत्वमेव स्यादित्यर्थः। ननु त
र्हि दृष्टुत्वादीनां घटप्रातिपदिकार्थत्वात्पर्यायत्वं स्यादित्याशंक्याह न च दृष्टुत्वादिकमिति प्रवृत्तिनिमि
त्तभेदमंतरेणैकस्मिन्नर्थे वृत्तिः पर्यायतार्थधर्मप्रकृते तु प्रवृत्तिनिमित्तभेदस्तेन सत्वान्न पर्यायतेत्यर्थः। न
र्हि कथमखंडार्थतेत्याशंक्याह तथापीति अपर्यायत्वेऽपि मुख्यपदार्थसाजिज्ञासने प्रश्नानुरूप

त्वप्रसंगादिति हस्तदृष्टुत्वादिनिजधर्मैनैकएव घटप्रातिपदिकार्थ उपलक्षणरूपैः पदार्थैरुपलक्षणीय इ
त्यतोऽखंडार्थता सिद्धेत्यर्थः॥ दार्ष्टांतिकमाह एवं विज्ञानानंदादिवाक्येऽपीति अयमर्थः विज्ञानशब्देन
तावद्विज्ञानत्वापरसामान्यमुच्यते तथानंदशब्देन चानंदत्वापरसामान्यमुच्यते ततः प्रवृत्तिनिमित्तभे
दान्न पर्यायता नाप्यखंडार्थतानुपपत्तिर्विज्ञानत्वव्यवच्छेदेन लक्षिताया एव ब्रह्मव्यक्तेरानंदपदेनाप्य
नानंदत्वव्यवच्छेदेन लक्ष्यमाणत्वान्न तु संबंधानुपपत्तिस्त्वालक्षणा प्रवर्त्तते सत्यमित्यपि विधेनैत्वं
य आध्यासिकएकस्यापि प्रकाशस्वरूपब्रह्मणो परापरसामान्याध्यारोपादनुपपत्तिरप्यस्ति मुख्यार्थप
रित्यागवत्तन प्रातिपदिकार्थस्य तु बोधयिति तस्यासंभवादिति मुक्तैव लक्षणा विपक्षे बाधकमाह विप
क्षे विशिष्टैवं तावदवांतरवाक्यस्याखंडार्थत्वमनुपपाद्येदानीं महावाक्यस्याखंडार्थत्वमाह द्वितीयेऽपीत्या
दिना समानाधिकरण्यवाक्यस्याखंडार्थत्वे साध्ये नीलमुत्पलमित्यादौ व्यभिचारः स्यात्तत्र गुणगुणिवाचि ॥५१
नो भेदस्य विद्यमानत्वात्तव्यवच्छेदार्थमाह द्रव्यनिष्ठत्वे समीविवक्षितमपि हि रूपं गुणं इत्यादौ व्यभिचारः

स्याभेदर्शमात्रकार्यकारणात्मक इति न नु सोयं देवदत्त इत्यनेन तद्देशतत्कालविशिष्टो देवदत्तो बोध्य
ते न साध्यविकलो दृष्टान्त इत्याशंक्याह न च साध्यविकल इति तद्देशतद्देशकालोपलक्षितो देवदत्तस्तद्दे
तद्देशाभेदरूत नेदन्त्वम निराकरणेन परस्मै प्रतिपाद्यते न तु विशिष्ट इत्यर्थः ॥ ननूपलक्षणविशेषणयोः
को भेदस्तत्राह विशेष्यव्यापकत्वे न तातन्नीतिमुत्पादयन्तस्य व्यावर्तकं विशेषणं यथा दंडो देवदत्तस्य विशे
ष्याननुप्रसक्ते न तया तस्यान्यतो व्यावर्तकमुपलक्षणं यथा काकोग्रहस्येति ननु तद्देशादिमद्भेदमेव कस्मान्न प्र
तिपद्यते तत्राह अपरस्य तत्रेति नेदन्त्वमानं प्रतिपन्ने निरकृतापरस्य कस्यचिदपि विशिष्याशस्य बोध
यितुमिष्टस्य तत्रासंभवात् विशिष्टयाभिन्नयादित्यर्थः ॥ ननु वेदस मदवदत्तस्याज्ञानं न विशिष्यते न तु
नेदन्त्वमानिवृत्तिः प्रमाणफलमित्याशंक्याह एकस्यापीति पदार्थाभिज्ञासमय एवासद्भावादित्यर्थः ॥ न
नु नेदन्त्वमनिवृत्तिः प्रमाणफलं नहि द्वितीयस्य नेदन्त्वायस्य प्रतिभासात्माख्यं सार्थं तासिद्धिरित्याशंक्या
ह आरोपितमिति सं न एतस्मास्मिन्नेदन्ता नान्यपगम्यते न तु क्वाप्यि कोपीत्यर्थः इदानीं दृष्टान्ते विकेयाऽयतितव्य

मक्षिवाक्येपीति तत्त्वमिति सामानाधिकरण्ये न तत्वंपदार्थयोरखण्डैकचमयत्वासंभवेन तत्त्वमुख्ययोर्नैसंनव
त्ति तथाहि सात्तास्म मायोपाधिज्ञानानंदाद्वितीयं ब्रह्म तत्पदार्थस्य संदेहसोत्पद मुख्यमासीदेकमेवाद्वि
तीयमित्यादिना ब्रह्म तस्य जगत्कारणस्य तदा पुरामशात्त्वंपदे न च सामान्यकार्यकारणसंघातोपाधि
संसारित्वमत्यक्त्वा तत्त्वमसि श्रीयते तत्त्वं तयोरैक्यासंभवति नाभ्यते विरुद्धधर्माक्रान्त चात संसर्ग एव तयोर्वा
क्येन बोध्यत इति चेत्तन्न शक्यते मुख्यसामानाधिकरण्यविरोधेन सामानाधिकरण्यप्रसंगात्
त्ति नन्वेकार्थत्वे भिन्नानां शब्दानामेकस्मिन्नर्थे वृत्तिर्मुख्यं सामानाधिकरण्यमिति तत्र इति भिन्नानां
शब्दानां नानार्थत्वे वृत्तिर्गौणं सामानाधिकरण्यं तस्मान्मुख्यार्थपरित्यागे हेत्वनुपपन्ना शबलपदार्था
न्तं स्वरूपे समारोपितत्वेन संबंधित्वामेकं स्वरूपमुपलक्ष्यत इत्यर्थः ॥ न च क्वं सामानाधिकरण्य
च विशेषणविशेष्यता लक्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्मनामिति ॥ब्राह्मदानीं वर्णितात्मनिरू ॥५२
पणस्य मोक्षफलत्वं दर्शयन्त्यनेन श्लोकेन एवमानन्दरूपायमित्यादिना इदानीं मोक्षस्वरूपं स्पष्ट

निकः पुनरस्ति तत्राह नित्यनिरतिशयसुखमित्येवंविधश्रमोऽत्र
अविद्यानिवृत्तिरित्येतन्नाह सर्वाविद्यास्तमय इति उक्तं हि ऐकात्म्याध्यासाद्धिधर्मको न संभवति किंचाऽ
विद्यासंस्तवे बीजं तन्नाशो मुक्तिरात्मन इति तन्न नतु निवृत्तिर्वा प्रतिपत्तिर्याथात्म्यानुभवसंश्रयात्
न्निरित्याशंक्याह नत्वविद्यानान्तनित्यसुखस्य हि सत्त्वे नैवास्ति निवृत्तिः साकथमविद्यानिवृ
त्तिः प्रकाशस्य तावत्स्वयं निरस्तत्वात् तमसः संभवति कोऽपि कस्मादारोपितं तद्दृष्टं तथेहाप्यविद्यासमारो
पएवानन्निवृत्तिरावरणं तन्निवृत्तिरेव वा निवृत्तिरित्यर्थः एतेन इदं मया ज्ञेयं यदाह कश्चित्तु स्वरूपेण
विद्यमानस्य पश्चाद्भूपगमो निवृत्तिर्न च स्वसंवेदनस्य सुखस्य सा संभवति निःशानां तत्सावियय
यादिनिवृत्तिनिवाऽऽडिडेऽज्ञेडे यावरणमपाभ एवास्ति निवृत्तिरिति । पूर्ववाद्याक्षिपति सापि कथमिति य
निवृत्तेस्तावान्निवृत्तिर्नेवाविद्याजवनाम तावद्भवति तावः । परिहरति अनिवृत्तिकार्यस्येत्यादिना
प्रतिबन्धेन नामस्वप्रकाशायेनानंदास्मि प्रकाशते येनेश्वरस्य एवं भास्य आगन्तावत्तिरोकरणं यथा ग्रन्थैरुक्ता

संयोगे आकाशस्य स्फोटादिकार्यस्य मन्त्रादिना प्रतिबन्धे नाम आगन्तावत्तिरोकरणं अनिवृत्तिकार्यविरोधि
नो दृष्टिवृत्तेः तस्यानन्निवृत्तिरिति परित्यागेन पर्युदासेनाविद्यानन्निवृत्तिशब्देनोच्यते इत्युक्तं नतु नि
वृत्तेस्तावानन्निवृत्तिरित्यभिप्रायेणत्याह ननु प्रसज्यप्रतिसंविद्रूपे कथमविद्यासंभवति यदि प्रमा
णतो न संभवति तथाप्युपगम्य तथैव यदि प्रतीतितो न संभवतीत्यादेः पक्षद्वयं तत्रानन्दत्वाद्यहंतेन
विरोधः । प्रपंचितं चैतदन्यत्र एवं सुखानन्निवृत्तेरविद्यात्मकत्वं प्रसाध्य मलनिवृत्तेः स्वतः तावत्सायाप्यविद्या
त्मकत्वं साधयितुमुपक्रमते दुःखमप्यात्मनीत्यादिना । इत्थं तेन तान्निद्वितीयं वक्ता कारणं नास्तीत्यत्र
प्रमाणमाह द्वितीयाद्वैकिं जन्यं भवति न च तदस्तीत्यर्थः । तर्हि कारणं पितापि वा स्वयं दुःखं तपिष्य
तीत्याशंक्याह कार्याणां चेति यस्मात्स्वाभाविकमागंतुकं वा दुःखं न भवति वाच्यं तस्मादित्युपसंहा
रः । आध्यात्मिकं दुःखं ज्वरपीडाद्याधिदैविकं विद्युत्पातादिर्शीतादिमनादि आधिभौतिकं वा ॥५३
प्रचोरादिकृतमित्यर्थः । ननु भवत्वविद्यापि वस्तुधर्मोपस्थापितं दुःखमविद्यात्मकमेव तथाप्यविद्या

लोदृष्टांतः। शाद्धअल्पयेघटादावपि घटादिरूपेणाप्रतिभासनादन्यथापरं प्रसिद्धदृष्टांतत्वेनाभिधानस्ये
वानुपपत्तेरिति। अस्तु तर्हि समारोपः समारोप्यं तु विचार्यते। किमसत् किं वासत् किं वोभयात्मकं
किं वान्यथाविलक्षणमिति। न तावदसत्तत्र प्रतिभासस्ते दर्शनस्योपलभ्यमानत्वानुपपत्तेः। न ह्यसति नरविषा
णादाव परोक्षावभासः कदाचिदुपलभ्यते नापि प्रवृत्तिरांतरालिकाद्विलक्षणादसत्येव काचि
देवींद्रस्य यमस्यापीति चेत् न वैलक्षण्याधिकरणत्वेनतुच्छरूपासत्वानुपपत्तेः तस्य निराकारस्यासदे
लक्षणमात्रेण चाभिधाने मायामतप्रवेशात्। नापि सदाद्यविरोधमघटत्वबाध्यते ततोऽन्यत्रास्तीति
चेत् न तत्रास्याप्रतीतेः। कल्पनानर्थक्याच्च। न ह्यन्यत्रसत्त्वमस्यात्र प्रतीतिमुपपादयेद्धि जयते
दान्तहिरूनलिनसत्तामात्रान्तरो न लितं प्रति भायात् तथा प्रतिजाने वान्यत्र दृष्टस्यान्यत्र स
त्तानकल्पनीयाच्छस्यैव तथाभूतस्यैकस्य संनयादिलनिपेधमन्यत्रास्तिघटवदिति चेत्
नैवमपि यदिज्ञानसारोपित तादात्म्यनयासिचाराद्यघटान्यत्रापि नास्तिकृतस्यत्रापि नलिनिष्पनः

तिवेदप्रसक्तेस्तादात्म्यवदिहापि नेदं रजतमित्याद्याकारेण तादात्म्यमेव निषिध्यते न स्वरूपमिति चेत्
न तथा सति वनस्पत्योर्विविविक्तयोर्द्वयोरप्यत्रेवामं नरं प्रतीतिप्रसक्तेः। प्रतिषेधप्रत्ययस्य कदाचिन्न
तत्र दृष्टं सलिलमालिन्यमया तत्रानुरूपं तरंगतमस्तीति विषयविकल्पेनापि ज्ञायते एवं कुत्र चेदमन्यत्र
नवद्रवेशुद्धोदेशांतरादावायदिक्रुद्धो गुंजापुंजापुंजादौ नलनादिसमारोपावसरः शरीरदाहादिप्रसं
गः। तत्रापि तस्यातात्त्विकत्वान्नप्रसंगः इति चेत् तथा तर्हि त्यं तमसत्त्वमनिर्वचनीयत्वं वा मया न वक्तव्यं
तरासं तदासत्त्वेवाद्यमनर्थक्रियात्मत्वाकारश्चेति चेत् न गुंजापुंजादावपि तद्धितदारोपेण दाहवर्षी नस्य
वर्त्ते ततदाकारस्य सर्वथैवादृष्टत्वशक्तिर्बाधाद्यसमर्थाकारेण समारोप्यमाणः स्वतः प्रवर्त्तयतीति चेत्
गुंजापुंजादिरिव तथा समारोप्यमाणः प्रवर्त्तयितु महिने नांतस्याचिके न बहिरारोपितेनामर्थेन स
मर्थालनास्य मारोप्यमाणेन कल्पितेन तवन्तु तर्हि देशांतरादावेव समारोपितस्यैव सद्भावो इतिचेन
न तथा सति विप्रकर्षिणोऽर्ई कुमशक्यत्वादन्यथातिप्रसंगाद्दोषसामर्थ्यात्तद्दर्शनमिति प्रसंगः ॥१८
तिचेद्दोषोऽप्यसदनिर्वचनीयं वा तादात्म्यवद्दर्शयतु दृष्टांतानुसारादेव तत्र च गत्यंतराभावात्तस्मान्ना

निरुपाधिकप्रेमगोचरः पुरुषार्थः पुरुषेणार्थ्यमानो वा पुरुषार्थ इत्यर्थः। इदानीं यास्मिंस्ते कस्य पुरुषार्थत्वोप
योगित्वेन ग्रहणं व्यर्थमित्याशङ्क्य तावतावेति न तु यत्र यत्र पुरुषेणार्थ्यते तत्र सर्वत्र लोके व्यतिरिक्तस्य दृष्ट
त्वो सोऽपि पुरुषार्थोपयोगी स्यादित्याशङ्क्याह दर्शनकथं तेनेति किं वात्यल्पमनित्तुच्छमिदमुच्यते न लोके ते
दस्य दृष्टत्वोऽन्यो ह्योपि त्वेदन नवितथमिति कथमित्यत आह स्वर्गार्थमपीति स्वर्गस्यापुरुषार्थस्यादर्शना
त्वकृन्निर्घटन इत्याह तथा हुभ्मिकामिनि समः समाधिरित्याह प्रत्यक्प्रकाशमानमिति तत्कार्थं सप्रमा
णं निगमयति तस्मिन्दृष्टे तदित्यादिना आनंदत्यादित्फकोऽनी नेयति चारः स्यानन्दर्थमननीतत्र वर्णप
रकीयानंदेत्यनिचारपरिहारायाह प्रत्यक्प्रकाशमान इति स्याद्व्यवहितनया प्रकाशमान इत्यर्थः। स्व
परोक्षतया प्रकाशमानो नेदत्यादित्यर्थः। विपक्षे दोषमाह अन्यथेत्यादिना दुःखोच्छेदस्य संभवात् पृथ
टने प्रहरनिर्बुद्धिमनामित्याह अन्यत्वं तदुःखादिना नानामिति दृष्टत्वं नानामिति निरीक्ष्य आगमगृहीत प्राकृतेऽ
नानामित्यर्थः। परिहारः स्पष्टः। तत्र हि रूपेगतोगिस्य तयोर्नानावच्छतीनि नीत्यातत्परित्यागेन मोहेतुर्दृष्ट

ते

त्रिनीतिष्यतीत्याशंक्याह नशीरीलि नयादिनिवाद्यार्थश्लोकेनोपसंहरति तस्मादिति सच्चमोक्षः केवल
ज्ञानलभ्यः किं वा समुच्चितलभ्य इति संदेहे सिद्धान्तोवा पक्रमते सर्वथापमित्यादिना दृष्टं तस्य साध्यवै
कल्यं परिहरति नहीत्यादिना न कुरुक्षु विद्यास्तमयः केवलज्ञानाद्भवति मोक्षे वविद्यास्तमयः केवल
ज्ञानान्न तावियमिति कोदोष इत्याशंक्याह विपर्यये चेत्यादिना यानन्मात्राकारणाद्याहृक्कार्यं दृष्टं
तादृशस्यैव कदाचित्कारणांतरादप्युत्पत्तौ तस्य कारणलक्षणं व्याहन्येत तत्र स्मिन्सतिसत्त्वं तीतिकत्वादि
कारा वादिहचसर्वत्रैवाविद्यास्तमयः केवलज्ञानादृष्टो यदि मोक्षे केवलज्ञानान्नस्यात् नूनं तदा नयव्याति
रेकात्मा भवगतं यदाविद्यानिवृत्ति हेतुत्वं तच्च ज्ञानस्य तद्विरुद्ध्यत इति भावः इदानीं मागमोपिप्रमाणमि
त्याह तद्वो कमित्यादिना नहि किंस वैयर्थ्यं कर्मणामनुपयोग इत्याशंक्याह कर्मणां तु नपरितिप्याहर ॥५५
वर्त्तिनीरज्जुसर्पमत्यमानस्यनिकटोपसर्पणलक्षणं कर्मसंप्रयोगकारणतया ज्ञानोत्पत्त्यानुपयुक्ता
तथाग्निहोत्रादीनां कर्मणामपि सत्त्वशुद्धिपरंपरया तत्त्वज्ञानोत्पत्तावुपयोग इत्यर्थः। परंपरयोपयोग

प्रमाणमाहृतं यच्चेत्यादिना न च श्वेन लिंगमिश्वतीत्यत्र नाश्वस्य करणस्येच्छयान्वयः किंतु फलेन तथा
त्रापि विवादि धूतीत्यसिनु वाच्येच्छयान करणानां यष्ट्यादीनामन्वयः किंतु फलेन नमो हेर्णेत्याशंकायामाह अ
श्वेन लिंगमिश्वतीति विवदितं तत्राप्यश्वस्य व्यमाणगमनक्रियासाधनत्वमेव ननु ग्रामप्राप्तिसाधनत्वं गम
नस्येव न त्वातिरपेक्षकारणतायां तद्यद्यपीष्यमाणज्ञानसाधनत्वमेव पक्षादीनां न तु मोक्षसाधनताश्राते
र्नीगमसंगादितिभावः। ग्रंथशेषस्य तिरोहितार्थः॥ ॥ अवतादहयग्रीवः कमलाकर ईश्वरः। सुरासु
रनराकारमधुपापीतपदांकजः॥१॥ अनुभूतिस्वरूपाख्यो यतिश्चक्रे निबंधनं। प्रमाणरत्नमालाया वि
वृद्धानंददायकं॥२॥ अनंतवत्त्रा॥ ॥ ॥ ॥ नमः शिवाय॥ ॥ ॥ ॥ ॥ शुभं॥

॥५६

[OrderDescription]
,CREATED=24.08.20 15:25
,TRANSFERRED=2020/08/24 at 15:34:03
,PAGES=57
,TYPE=STD
,NAME=S0003528
,Book Name=M-1549-PRAKARAN RATANMALA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,